Shri Raghunath Temple MSS. Library,
JAMMU

No. १३१८

Title आख्यात वाद टिप्पनी

Author रघुदेव भट्टाचार्य:

Extent २५ Age

Subject न्याय वैशेषिकं

व्याख्यानवाद टिप्पनी

१२८ २५

आख्यातवादस्य टिप्पणं रघुदेवकृतं

राम
१

श्रीगणेशाय नमः ॥ प्रणम्य नीरदःश्याम मुकुन्दमसुमनमंदिरं ॥ आख्यातवादस्य व्याख्या रघुदेवेन तन्यते ॥ नैयायिकः परमतं निराकर्तुं प्रथम-
रू तःस्वमतं निँपयति ॥ आख्यातस्येति ॥ यत्नो वाच्यः ॥ यत्नत्वविशिष्टो वाच्यः ॥ यत्नत्वं शक्यतावच्छेदकमिति यावत् ॥ यथाश्रुते यत्नस्य व्यापा-
रांतर्गतत्वेन व्यापारशक्तिवादिमतव्यवच्छेदाऽप्रतीतेः ॥ शक्यतावच्छेदकं चाख्यातत्वं ॥ तच्च रूढिसंबंधेनाख्यातपदवत्वं ॥ यद्वा रूढिसंबंधे-
नाख्यातपदवत्वं लकारेष्वेवाऽभियुक्तानां तत्रैवाख्यातपदप्रयोगात् ॥ तथा च पचन्तीत्यादावपि कृतिबोधापत्तिः ॥ तत्रापि लकारस्थाने
शत्रादेशेन रूढिसंबंधेनाख्यातपदवत्वोल्लकारस्य सत्त्वादिति विभाव्यते ॥ तद्विशिष्य तिप्त्वादिकमेव शक्यतावच्छेदकं बोध्यम् ॥ एतेन लं दशलका-
रसाधारणं लत्वमेव शक्यतावच्छेदकमिति परास्तं ॥ तस्यैकस्याभावात् ॥ भावे वा पचन्तीत्यादावपि कृतिबोधप्रसंगादिति ॥ तथा च यत्नत्वावच्छि-
न्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति यत्नत्वावच्छिन्नविशेष्यकरूढिसंबंधप्रकारकाख्यातपदवत्त्वावच्छिन्ननिरूपितशक्तिविषयकज्ञानज-
न्योपस्थितित्वेन हेतुत्वं कल्पनीयमिति ॥ ध्येयं ॥ नन्वेवं पददर्शितकार्यकारणभावकल्पने शुद्धाख्यातपदात् यत्नविषयकशाब्दबोधाप-
त्तिरिति चेत् ॥ असंभवस्त्वेव ॥ यद्वि पाकानुकूलयत्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तिपादिनिष्ठ पचादिधात्वव्यव-
हितोत्तरत्वरूपाऽनुपूर्वीज्ञानस्य हेतुत्वं न कल्प्येत ॥ वस्तुतः शुद्धाख्यातपदजन्ययत्नोपस्थितिकाले पा-
कोयत्नश्चेति निराकांक्षवाक्यात् पाकानुकूलयत्नविषयकशाब्दबोधवारणाय तादृशकार्यकारणभावकल्प-
नीया ॥ आवश्यकत्वेनोपदर्शिताख्यातपदनिरूपितशक्तिज्ञानयत्नोपस्थितिमात्रस्य शाब्दबोधे जनननी-
येपचतीत्याद्यानुपूर्वीज्ञानस्य सहकारित्वकल्पने नैव केवलाख्यातपदात् यत्नविषयकशाब्दबोधवारणसंभ- रघु
वात् ॥ केचित्तु ॥ आख्यातस्य यत्नवाचकत्वे पाकगोचरनिरुक्ताख्यातयत्नकाले चैत्रः पचतीति प्रयोगस्य योग्य १

त्यापत्तिमुद्भावयंति । तन्न श्रद्दधीमहि । भवत्सद्भावातिरिक्तस्याख्यातत्वेनाभावात् । वस्तुतस्तु निवसाख्यप्रसंगांगीकारेऽव
नस्त्याप्तिः । पचतः पचतीति वाक्यात् पाकानुकूलकृतेरेव शाब्दबोधोत्पत्त्या निवसाख्यापत्तिकाले पाकानुकूलकृतेरेवैभोन
तदानीं तथाप्रयोगस्य तथाविधप्रमात्मकबोधाजनकतया । योग्यत्वं सत्पदमेवेति । येन पदार्थेन तात्पर्यविषयप्रतीति
समेवाख्यातपदस्यानंतावच्छेदकमुपवर्णयंति । तेषां मतेऽपि साधनताज्ञानादिजन्यतावच्छेदककोटिप्रविष्टत्वेनासिद्ध
याः प्रवृत्तित्वजातेः ईश्वरीयकृतिसाधारण्यात् तन्मानाभावेन ईश्वरत्वेऽपि वेदं तं क्रीतिमूलकबोधनिर्वाहः पारचिंतनीयः ।
न च तत्राख्यातस्य कृतौ लक्षणाया नानुपपत्तिरिति वाच्यं । उपदर्शितरीत्या तादृशार्थावगाहजन्यशाब्दबोधस्य सर्वत्रैव
निर्वाहे लक्षणाकल्पनाया अन्याय्यत्वात् । न चाख्यातस्य यत्नत्वावच्छिन्ने शक्तौ चैत्रः पचतीत्यादिवदीश्वरः
पचतीत्यादिप्रयोगापत्तिवारणाय चरमाख्यातस्य प्रवृत्तित्वविशिष्टे शक्तत्वमुपगंतव्यमिति वाच्यं । आत्मा पचती
त्यादिप्रयोगवत् तद्वारणासंभवात् । तथाहि । आख्यातस्य यत्नत्वविशिष्टवाचकत्वे आत्मा पचतीत्यादिप्रयोगापत्ति
रित्सत्र तथाविधप्रयोगस्य शाब्दार्थः तथाविधशाब्दबोधो वा । तथाविधशाब्दजन्यप्रमात्मकबोधो वा । नाद्यः । कंठताल्वाद्य
भिघातरूपकारणसत्त्वे तथाविधशब्दस्योत्पत्तिः । नांत्यः । तथाविधशाब्दबोधस्यापादकाभावात् । योग्यताज्ञा
नमेवापादकमिति नु नाशंकनीयं । यतस्तथाविधशाब्दबोधाप्रसिद्ध्या न तादृशशाब्दबोधं प्रति तादृशयोग्य
ताज्ञानत्वेन हेतुत्वं कल्पनस्यानिष्प्रयोजनकत्वात् । ननु पाकाद्यनुकूलकृतिमानयमित्यादिशाब्दबोधं प्रति

तत्समानाकारकयोग्यताज्ञानस्य धर्मितावच्छेदकभेदेन हेतुत्वकल्पने गौरवान्न समानधर्मितावच्छेदकताप्रयासः सैव तथाविधयो-
ग्यताज्ञानशाब्दबोधयोः हेतुहेतुमद्भावसमुचितः तथा च पाकानुकूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दत्वावच्छिन्नं
प्रति पाकानुकूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन ज्ञानत्वेन हेतुत्वमिति योग्यताज्ञानशाब्दबोधयोः हेतुहेतुमद्भा-
वे स्थिते तादृशसंबंधेन पाकानुकूलकृतिप्रकारकज्ञानस्यासत्त्वे सत्तादृशबोधापत्तेः क्रियमाणं यत् फलतः पाकानुकूलकृति-
मत्त्वेति शाब्दबोधापत्तिरिति तु मा शंकिष्ठाः अवच्छेदकतासंबंधावच्छिन्नतादृशकृतिप्रकारताकशाब्दबोधं प्रति तथाविध
अ योग्यताज्ञानस्य हेतुतायाः कल्पनीयतया स्नापयतीत्यादौ विशेष्यदर्शितानां तादृशयोग्यताज्ञानाभावे तथाविधप्रमात्मक
शाब्दबोधापत्तेरन्यथा चैवं चेश्वरः पचतीत्यादिवाक्यजन्यतादृशबोधापत्तिवारणस्यापि सुलभत्वात् न चैवं ईश्वरो नेदं वक्ती
ति प्रयोगोऽनुपपन्नः ईश्वरेऽवच्छेदकतासंबंधेन कृतेरभावादिति वाच्यं तत्र समवायसंबंधेन तादृशकृतिप्रकारकशाब्दं प्रति तथा
विधानुपूर्वीज्ञानस्य हेतुत्वकल्पनादीश्वरः पचतीत्यादितः तथाविधशाब्दबोधस्यानुत्पादेन तथाविधकल्पनाया असंभवा
दाऽजनकत्वात् आम्नापयतीश्वरः पचतीत्यादिवाक्यजन्यतथाविधबोधेऽपीष्टापत्तिमंगीकुर्वतीत्यलमधिकेन नन्वप
लक्षितविशेष आख्यातपदस्य शक्तौ किं प्रमाणमित्यत आह पचतीत्यादि कृतेतीत्यनंतरं क्रमेणेति शेषः सर्वाख्याताव
वरणादिति दशलकाराणामर्थकरणादित्यर्थः पूर्वोक्तरीतवाक्यस्योत्तरवाक्येनार्थकथनं विवरणमित्यस्य तल्ल रघु
क्षणत्वमिति भावः ननु विवरणस्य कथं शक्तिग्राहकत्वं शाब्दविधयाऽनुमानविधया वा नाद्यः पाकं करोतीत्यादि २
विवरणस्य पाकविषयकयत्नमात्रबोधकत्वेन पचत्याख्यातशक्तिबोधकतया तस्य शक्तिग्राहकशाब्दविधया प्रमाणत्वासं

भवात्। नो सः। साध्यहेतुप्रयोगासंभवादिति चेन्न। आख्यातपदं यत्र यत्र विशिष्टे शक्तं बाधकं विना पदान्तरं विशिष्टार्थं कक
रोतीति प्रतिपादितार्थकत्वात्। पाकत्वविशिष्टे शक्तपदप्रतिपादितार्थकपचपदवत्। यद्यपि विशिष्टबोधकपदप्रतिपादितार्थ
कं भवति तत्र व्यभिचार मतिसामान्यव्याप्ताविवरणस्यापि शक्तिग्राहकत्वसंभवात्। ननु पदशक्तिमनुमानमप्रयोजक
मत आह। व्यवहारादिवेति। बाधकं विना। अन्यलभ्यत्वप्रतिसंधानं विना। इदं च मिलितं आख्यातस्य शक्तिग्राहकत्वे सार्थ नु
मुक्तं। अनुसन्धेरिति। शक्तिग्रहसंभवादिति भावः। तथा च विवरणहेतुकानुमानस्य शक्तिग्राहकत्वे तुल्ययुक्त्या व्य
वहारहेतुकानुमानस्यापि शक्तिग्राहकतया घटत्वादिविशिष्टे घटपदादेरपि शक्तिविलोपप्रसंग इति भावः। ननु
विवरणेनान्यैव शक्तिग्राहकं पचत्यौ नौ लभ्यत्वप्रतिसंधानवार्त्ता। प्रकृते तु पाको यत्नजन्यः पाकत्वादित्यनुमानादिविषय
त्वस्य लाभसंभवेनान्यलभ्यत्वात्। अन्यलभ्यस्याख्यातपदशक्यत्वे किमपराद्धं धर्मिलिङ्गस्येत्याह। किंकरोतीत्यादिना। यत्नप्र
श्नेन। यत्नत्वविशिष्टजिज्ञासितार्थसंबंधबोधकशब्दप्रयोगे। पचतीत्युत्तरस्य। उत्तरकालभाविपचतीतिवाक्य उपदर्शितप्रश्न
निवर्तकत्वस्य। यत्नार्थकत्वं विना। यत्नत्वविशिष्टपाकसंबंधबोधं विना। अयं भावः। यद्धर्मविशिष्टयद्धर्मावच्छिन्नस्य संबंधः
यत्प्रश्नवाक्यात्प्रतीयते तद्धर्मविशिष्टतद्धर्मव्याप्यधर्मावच्छिन्नसंबंधबोधश्चेदुत्तरवाक्यात्प्रतीयते तदा तदुत्तर
वाक्यं तत्प्रश्ननिवर्तकं भवति। यदा घटत्वविशिष्टजिज्ञासितसंबंधबोधके कस्माद्धट इति प्रश्ने घटत्वविशिष्टदंडजन्यत्व
बोधके दंडाद्धट इत्युत्तरवाक्यस्य निवर्तकत्वात्। प्रकृते चाख्यातस्य यत्नत्वविशिष्टवाचकत्वे व्यापारत्वात्यापचतीतिवाक्यात्पा
कानुकूलव्यापारबोधाभ्युपगमे यत्नत्वविशिष्टपाकसंबंधबोधाभावात्। न हि वाक्यस्य यत्नत्वविशिष्टजिज्ञासितार्थसंबंधबोध

राम
३

३

कर्त्राभावेन । किंकरोतीतिप्रश्नवाक्यनिवर्त्तकत्वानुपपत्त्याऽन्यलभ्यत्वेऽपि आख्यातस्य यत्ने लक्षणेष्टेत्यभिप्रायवत्स्य कीर्तिः । ननु रथो गच्छ
तीत्यादौ आख्यातस्य यत्नबोधकत्वासंभवेन व्यापारे लक्षणाभिप्रायवत्स्य कीर्त्तनत आह । अचेतनेति । अचेतनार्थमुख्यविशेष्यकबो
धजनके वाक्ये इत्यर्थः । अनुकूलव्यापार इति । अत्रानुकूलत्वं कीर्त्तनं तु गमनस्य तेन संबंधेन व्यापारेऽन्वयबोधस्य कारणाय ।
ननु तदंतर्भावेनापि लक्षणायां नाप्यर्थत्वात्तत्र गमनस्यान्वये । पदार्थः पदार्थेनान्वेति ननु पदार्थैकदेशेन इति व्युत्पत्ति
विरोधात् । तत्र व्यापारे लक्षणावादिमतं दूषयति । अन्यदीयेति । रथगमनानुकूलनोदनाख्यसंयोगादिमति निश्चलपु
रुषेऽयं पुरुषो गच्छतीति प्रयोगादित्यर्थः । नैयायिकाख्यातस्य व्यापारलक्षणावादिमते । हैतीशानिश्चलपुरुषेऽपि गमनानुकू
लनोदनाख्यसंयोगादिरूपव्यापारवत्त्वात्पुरुषो गच्छतीत्यादिप्रयोगापत्तिरिति भावः । ननु तादृशपुरुषे तथाविधप्रयोगापत्ति
स्तथाविधवाक्यजन्यप्रमात्मकबोधापत्तिः । सा च तादृशपुरुषस्य निश्चलतादशायामुत्पाद्यतेऽन्यदा वा । असंभवापत्तिः ।
आद्ये तत्काले गमनाभावेन तादृशशाब्दबोधाप्रसिद्धा आपत्त्यसंभव इत्यत आह । जानातीत्यादि । केचित्तु । सामानाधिकरण्यसंबंधे
न वर्त्तमानगमनविशिष्टव्यापारे आख्यातलक्षणाकल्पनान्नोपदर्शितापत्तिरित्यत आह । जानातीत्याहुः । अत्र वस्तुतो जानातीत्यादौ व्यापारस्या
विप्रसत्वादुक्तमीदृङ्नीति । कृतिव्यापारयोरित्यादि । केचित्तु कृतिबोधव्यापारलक्षणाकल्पनामोरभ्यां केचिच्च कृतिव्यापारयोर्बोधेन कृति
व्यापारयोः प्रतीतिसंभवादित्यर्थः । अत्र प्रथमप्रतीकं जानातीत्यारभ्य द्वितीयं तेनान्वेति । द्वितीयप्रतीकं तु विघटते निद्रातीत्यंतेन । नन्वे
जानातीत्यादिचतुष्टयस्य व्यापारे आख्यातस्य लक्षणायैवोपपत्तौ तन्नाभयपक्षे लक्षणाकल्पनमनर्थकमिति चेदत्र ना । अनंतलक्षणा
कल्पनापेक्षयाऽऽश्रयपक्षे कल्पनायाः लघुत्वात् । विघटते निद्रातीत्यादावाख्यातस्य व्यापारबोधकत्वे प्रसक्तेरवना । वर्त्तमानकाल

लय
बी
ते
रूफ
३

संबंधित्वस्य विरुद्धत्वात् अर्थस्याभिधानस्य मनःसंयोगरूपस्य निष्ठापदार्थस्यानुकूलो यो व्यापारस्तत्तुल्यत्वादावभावादिति भावः॥ ननु जानातीत्यादा
वाश्रयत्वे। आख्यातस्य लक्षणाकल्पने चैत्रो घटं जानातीति प्रयोगकाले घटाज्ञानवति मैत्रे चैत्रो घटं जानातीति प्रयोगापत्तिः। एकत्वैकोक्तौ नत्वा
संबंधावच्छिन्नतदाश्रयत्वस्य तदानीं मैत्रेऽपि सत्त्वात्। न तु संबंधावच्छिन्नाश्रयत्वे लक्षणाकल्पने पुनरति गौरवं। न तदपेक्षया रम्योल पा
क्षणाकल्पने मेवाध्याये तिप्रसंगस्य तु केचिद्विषयतारूपदर्शितरीत्या तारलीयत्वान्तो यद्विचाख्यातस्याश्रयत्वे नाश्रयत्वसामान्ये लक्षणा। स
जानातीत्यादौ आश्रयत्वलक्षणे च समवायसंबंधावच्छिन्नाश्रयत्वस्यैव बोधस्तत्र च कार्यकारणभावकल्पनात्। तथा विव्यापार
ना लक्षणापेक्षया गौरवादवनेरिसत आह यत्नादिमत्तेति। आदिना ज्ञानादिपरिग्रहः। मात्रपदेन व्यापारव्यवच्छेदः। तथा चानुभवानुरो
रू धेनागत्या न संबंधावच्छिन्नाश्रयत्वे लक्षणा न त्वाविच्छिन्नेन कार्यकारणभावो वा कल्प्यतेति भावः। केचित्तु। ननु पदर्शितस्थ
लेषु व्यापारस्यैवाश्रयत्वस्याप्रतीतेरलं तत्र लक्षणयेत्यत आह। यत्नादिमत्त्वेनेत्यादिना हुः। नन्वाख्यातस्य मुख्यार्थबाधस्थले सर्वत्राश्रय
त्वे लक्षणाकल्पनं नूनं संभवति। घटो नश्यतीत्यादौ प्रतीत्यसंभवात्। घटस्य नष्टत्वेन नाशरूपफलाभावात्। प्रतियोगितासंबंधेन ना
शावच्छिन्नं प्रति प्रतियोगिनस्तादात्म्यसंबंधेन हेतुत्वात् नु तु रोधेन नष्टस्यापि प्रतियोगितासंबंधेन नाशाश्रयत्वांगीकारेऽपि पुन
र्घटनाशप्रतियोगित्वे एव लक्षणाकल्पनस्यौचित्यादित्यत आह। नश्यतीत्यादाविति। निरूढेति। अनादिसिद्धेत्यर्थः। ननु प
दर्शितबहुप्रयोगसत्त्वे तत्र शक्तिरेव किमिति न कल्प्यत इति चेत्। फलत्वरूपलघुधर्मावच्छेदकसंभवेन तत्संबंधघटिताश्रय
त्वावच्छिन्ने शक्तिकल्पने गौरवाज्ञानरूपप्रतिबंधस्यैकैकजलांजलिः प्रसज्येत। न चाश्रयत्वस्यातिरिक्तत्वमभ्युपेत्य तत
न्नैवावच्छिन्ने शक्तिकल्पने बाधकाभावादवाच्यं। तद्धि व्यापारत्वेन यदि अतिरिक्तमेकमभ्युपेत्य तदवच्छिन्नेऽपि शक्तिकल्पनस्यौ
चित्यात्। न चेष्टापत्तिः। तथा सति विनिगमकाभावादनंततत्तद्धर्मावच्छिन्ने शक्तिकल्पनोपेक्षणीयत्वाघातात्। क्वचित्तु फलत्वा

राम
४

वच्छिन्नत्वस्य आख्यातस्य शक्तिकल्पने बाधकाभावात्॥ एतेन सर्वत्रायत्नमतिरिक्तं स्वीकृत्य तदवच्छिन्ने आख्यातस्य शक्तिरन्यत्र ल
क्षणेत्यपि निरस्तः॥ उच्यते॥ रवीमविनिगमनाविरहेण तत्तदनंतरं धर्मावच्छिन्ने शक्तिकल्पनाप्रसक्तेः गौरवस्य जागरूकत्वादि
त्यग्रे वक्ष्यामः॥ ननु चैत्रो जानातीत्यादौ आश्रयत्वे निरूढलक्षणाकल्पनं निरर्थकमेव तत्राश्रयतासंबंधेन चैत्रे ज्ञानस्याप
स्यानं पातर्थान्वये नैवोपपद्यते तावता तदुपपत्तेः॥ तत्राश्रयत्वप्रकारकानुभवस्यासिद्धेः॥ इति चिंतामणिकारमतं दूषणमाह॥ चैत्रः पचती
त्यादि॥ अन्वयाबोधो भाति॥ चैत्रः पचति तंडुलं इत्यादौ कर्मतासंबंधेन पाके तंडुलं इत्यस्य चैत्रः पचति तंडुलं इत्यस्य च पाके कर्तृ
दि तासंबंधेन चैत्रस्यान्वयानुभवाभावादित्यर्थः॥ धात्वर्थे प्रातिपदिकार्थयोरिति आख्यातार्थनामार्थयोर् भेदातिरिक्तसाक्षात्संबंधेनान्व
यबोधस्याव्युत्पन्नत्वेत्यर्थः॥ अस्तोकं पचतीत्यादावभेदसंबंधेन धात्वर्थे नामार्थस्तोकस्यान्वयाद्व्युत्पत्तिभंगः॥ अतोऽ घु
भेदातिरिक्तेति॥ ननु तत्र विशेषणविभक्तेरेवाभेदार्थः॥ तत्रैव च स्तोकस्यान्वयोऽभ्युपेयते तथा तत्राभेदातिरिक्त
त्वविशेषणस्यानुपादानेपि न दोषः॥ नामार्थप्रत्ययार्थयोरेवान्वयबोधस्य तत्रोत्पन्नत्वादिति चेन्न सत्याविशेषण
विभक्तेः साधुत्वेनाभेदार्थकत्वासंभवात्॥ तस्याभेदार्थकत्वेपि लुप्तविभक्तिमनुसंधानस्य स्तोकः पाक इत्या
दावभेदसंबंधेन पाके स्तोकस्यान्वयबोधस्यानुभवसिद्धत्वात् तत्रैवाभेदातिरिक्तत्वविशेषणव्यावृत्तिदानस्यासंभ
वात्॥ तत्र लुप्तविभक्तेरनुसंधानं विनाशाब्दबोधानभ्युपगमे राजपुरुष इत्यादौ राजपुरुषपदस्य राजसंबं
धिनि लक्षणया तत्रापि तथात्वं कुशकपत्त्वादिति॥ तंडुलं पचतीत्यादौ पाके तंडुलकर्मत्वस्येव कर्मतासंबंधेन रामः
तंडुलस्यापि बोधोत्पत्तावुत्पत्तिभंगप्रसंगवारणाय सामानाधिकरण्येन नामार्थधात्वर्थयोरभेदान्वितविभक्त्यर्था ४

तिरिक्ते स्वार्थः । ननु तथापि नञ्कलंजं भक्षयेदित्यत्र विध्यर्थैवलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वान्वितनञर्थाभावस्य
धात्वर्थे कलंजभक्षणादौवान्वयात् तत्रैव नञ्च्छुसन्निभंगो अंशाकापरिहार इति चेन्न । निपातातिरिक्तत्वं नाम्नि
५८ विशेषणीयं । स्वीकुरुतां नञर्थस्याभाववतिलक्षणात् तस्याभेदसंबंधेन तत्र धात्वर्थेऽन्वयतीसंबंधमर्यादयेति ।
चैत्रो जानातीत्यादौ धात्वर्थे नामार्थस्य संसर्गमर्यादया आश्रयत्वस्य भानासंभवादित्यर्थः । तथा च तादृशानु
त्पत्स्यनुरोधेन नामार्थनिष्ठाभेदाद्यतिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेद
कतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासं
बंधेन हेतुत्वं कल्पनीयं एवं धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वाव
[illegible]न्नं प्रति सपीति तिन्नं चैत्रो जानातीत्यादावाश्रयतासंबंधेन धात्वर्थज्ञानस्य नामार्थेऽन्वयबोधसंभवादि
तिभावः । अत्र चिंतामणिकारमतानुयायिनः । चैत्रः पचति तंडुलमित्यादौ कर्मतासंबंधेन तंडुलस्य पाके
न्वयबोधवारणाय नामार्थनिष्ठतथाविधप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धि
त्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वं च कल्पनमस्तो
धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति तथाविधोपस्थि
तेः हेतुत्वं च कल्पनं निर्गमालिकल्पनादरणीयं । तथा च चैत्रो जानातीत्यादौ आश्रयतासंबंधेन धात्व
र्थस्य नामार्थेऽन्वयबोधबाधका[illegible]तस्य विरुद्धलक्षणाकल्पनमिति तु ना

जानीमहे। न चाख्यातस्याश्रयत्वे लक्षणानंगीकारे जानातीत्यादावाश्रयस प्रकारकबोधानुभवापत्तेः प्रसंग
इति चेन्न। आश्रयः स्वमात्रानुभवबलात् तथा बोधकमुद्भावयसीत्याहुः। अत्र विनिगमकं ते वहुवः। जानातीत्यादावाख्या
तस्याश्रयत्वस्यादौ रसिकल्पलक्षणा ज्ञानमकोले ज्ञानी घट इत्यादि इति शाब्दबोधोपपत्तये घटादिविशेष्यकज्ञा
धा नप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति द्वितीयं तु। समभिव्याहृत आख्यातज्ञानजन्यघटाद्युपस्थितेर्हेतुत्वकल्प
व नेघटत्वपटत्वादिभेदेनानंतकार्यकारणभावकल्पनापत्त्या गौरवात्। तदपेक्षया तदाश्रयत्वे तत्त्वज्ञाननिष्ठप्रकारतानिरू
पितावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति आख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधे
न हेतुत्वकल्पनेव ज्यायसी तथा च नानाकार्यकारणभावानापत्तेः। कथं चैत्रो जानातीत्यादौ आश्रयतासंबंधेन धात्वर्थस्याऽ
न्वय इति तत्राख्यातस्याश्रयत्वे लक्षणावश्यकीति। परंतु। घटत्वपटत्वादिकमनिवेश्य तथाविधकार्यकारणभावक
ल्पने ज्ञानी घट इति योग्यताज्ञानबलात् तथाविधाख्यातपदज्ञानजन्यघटाद्युपस्थितिदशायां ज्ञानी घट इति
शाब्दबोधस्य समवायसंबंधेनाऽसन्यापत्तिर्दुर्वार [illegible] दिच विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या शाब्दबुद्धियोग्य
ताज्ञानयोरपि कार्यकारणभावः कल्प्यते। तथापि भिन्नविषयकानुमितिसामग्र्यभाव निरूपकारणबलात् तदान
थाँ शाब्दबोधापत्तेरात्मनि ब्रह्मणोपि दुःसमाधेयत्वे सर्वत्र घटपटादिकं निवेश्य तथाविधसमभिव्याहारज्ञानजन्यो ८
×स्वधर्म पस्थितिशाब्दबोधयोः कार्यकारणभावकल्पनामिति किं वा कृतं। चैत्रो जानातीत्यादौ चैत्रे आश्रयतासंबं
धेन ज्ञानस्यान्वय इति। तन्न। उपदर्शितशाब्दबोधपदजन्योपस्थितेरविषयभेदेन कार्यकारणभावकल्पने तादृशपक् ८७
क्षेः सह विनिगमनाविरहेण कार्यकारणभावानंत्यात्। कारणतावच्छेदकगौरवाच्च। तदपेक्षया घटत्वादिवत्तिविषय ५

तासंबंधेन ज्ञानत्वावच्छिन्नं प्रति घटत्वादिवृत्तिविषयतासंबंधेन ज्ञानत्वेन हेतुत्वकल्पनस्य सम्यक्त्वतया पर्यवसंभवात् । तथा हि । विरोधिसा
धा मग्र्यभावेन ज्ञानीयो घट इति शाब्दबोधे जननीये ज्ञात्युसमभिव्याताख्यापेते द्वन्योपस्थितिविशिष्टघटत्वप्रकारकज्ञानादेः
सहकारित्वं कल्पनीयं घटत्वप्रकारकज्ञानेन धाविधविशिष्टोपस्थितिवैशिष्ट्यं च प्रकारतासंबंधेन पक्षत्वाधिकरणं तन्निरू
पितविशेष्यतासंबंधावच्छिन्नवृत्तित्वरूपसामानाधिकरण्यसंबंधेन । तथा च नादृशाख्यातपदज्ञानजन्यपदार्थोपस्थितिकालेऽतथा
विधसामानाधिकरण्यसंबंधेन तादृशाख्यातपदज्ञानजन्योपस्थितिविशिष्टघटत्वज्ञानं तत्स्वरूपसहकार्यभावेन विरोधि
सामग्र्यभावरूपकारणबलात् नीलमणिज्ञानीयो घट इति शाब्दबोधापत्तिः । न च तथापि पुरुषांतरस्याख्यातपदज्ञानजन्यपदा
र्थोपस्थितिकाले पुरुषांतरात्मनि ज्ञानीयो घट इति शाब्दबोधापत्तिर्दुर्वारितैवेति वाच्यं । एकात्मसत्वेन स्वात्मसंयोगितआपत्तिवार
णार्थं तदात्मसमवेतत्वावच्छिन्नप्रतितास्य दोसंबंधेन तत्र तादात्म्येनापि हेतुत्वस्यावश्यकतया तत्संसर्गेनरूपीयोपदर्शिताख्यातपद
जन्योपस्थितिविशिष्टत्वतत्समुरूपीयघटत्वज्ञानत्वावच्छिन्नविशिष्टतत्तदात्मविशिष्टविरोधिसामग्र्यभावस्य ज्ञानीयो घट इति
शाब्दबोधसामग्रीत्वाभ्युपगमेन कथमप्यनुपपत्तेरभावात् । घटत्वज्ञानत्वावच्छिन्ने वैशिष्ट्यं तत्तदात्मनि एककालीनत्वसंबंधेन वि
रोधिसामग्र्यभावे तत्तदात्मवैशिष्ट्यं च तादात्म्यविशेषणताभयघटितसामानाधिकरण्यसंबंधेन बोध्यं । तथा च ज्ञानत्वावच्छिन्नप्र
कारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति प्रकारतासंबंधेन तथाविधाख्यातपदजन्योपस्थितेः
हेतुत्वस्य निर्दुष्टतया तादृशहेतुत्वसंभवात् । चैत्रो जानातीत्यादौ चैत्रोऽप्याश्रयतासंबंधेन ज्ञानान्वयबोधासंभवेन तत्राख्यातस्याश्र
यत्वे लक्षणावश्यकीति सारांके चिन्तु । चैत्रो जानातीत्यादौ चैत्रे आश्रयतासंबंधेन ज्ञानान्वयाभ्युपगमे प्रस्थितमाख्यातस्य लक्षि

शान्यापि चैत्रः पचतीत्यादावपि स्वानुकूलकृतिमत्त्वसंबंधेनैव चैत्रे पाकान्वयबोधस्य वक्तुमुचितत्वात्। यदि च धात्वर्थस्य नामार्थेऽन्वयो मु
सन्न इति न तथाविधबोधस्यासंभवेनाख्यातस्य कृतिशक्तिरावश्यकीति विभाव्यते तदा जानातीत्यादावपि आश्रयत्वे लक्षणा कल्प
नमावश्यकमिति साधु। इदमत्र चिंतनीयं। चैत्रः पचतीत्यादौ स्वानुकूलकृतिमत्त्वसंबंधेन चैत्रे पाकान्वये चैत्रो न पचतीत्यादौ
स्वानुकूलकृतिमत्त्वसंबंधावच्छिन्नप्रतियोगिकपाकाभाववान् चैत्र इति बोधो वाच्यः। तथा तादृशसंबंधस्य वृत्त्यनियाम
कत्वादृत्त्यनियामकसंबंधस्य च प्रतियोगितानवच्छेदकत्वात्, संमितंडुवीरख्यातौ तस्य कृतिवाचकत्वं। चैत्रो जानातीत्या
दौ त्वाश्रयतासंबंधेन चैत्रे ज्ञानान्वये आश्रयतासंबंधस्य वृत्तिनियामकत्वात् चैत्रो न जानातीत्यादौ न किंचिद्बाधकमि
ति न रूपदर्शितविवरणं वलात् आख्यातस्य यत्नवाचकत्वं तदैवायाति यदि क्रियोपलार्थकत्वं न देवनुकृतत्वस्य व्या
पारत्वविशिष्टशक्तिकल्पने बाधकाभावादित्यत आह। क्रियमष्टेत्यादि। क्रियाजन्यत्वेति। संयोगरूपव्यापारजन्यत्वप्र
तिसंधानाविरहेपीत्यर्थः। तथा च कृधातोर्व्यापारार्थकत्वे पटांकुरादौ व्यापारजन्यत्वप्रतिसंधानकाले कृतिजन्यत्वप्रतिसंधा
नाभावात् घटः कृतोंऽकुरः कृतेन कृत इति व्यवहारः सर्वानुभवसिद्धो न स्यात्। न त्वंकुरे व्यापारजन्यत्वज्ञानसत्त्वे व्यापारज
न्यरूपव्यवहारे प्रतिबंधकज्ञानाभावादिति भावः। कृधातोर्यत्नार्थकत्वे युक्त्यंतरमाह। ज्ञात्रादिवदिति। ज्ञातादृशादौ यथाऽश्रय
बोधकतृचपदसमभिव्याहृतज्ञाधातुपदात् ज्ञानाश्रयश्चैत्रः इति बोधः। तद्वत् कर्त्रादिस्थलेऽपि। आश्रयबोधकतृचपद रुख
समभिव्याहृतकृधातुपदात् कृत्याश्रय इति बोध उपपद्यते सति कृधातोर्यत्नार्थकत्वे नैव भवतीति तस्य यत्नार्थक
त्वमावश्यकमिति भावः। इदमत्र बोध्यं। कर्त्रादिपदस्य कर्तरि शक्तिः। न च लाघवात् कर्त्रादिपदस्य कृतौ शक्तिरंगी ६

क्रियतामित्यत्र वाच्यं। तथा सति पक्तो चैत्रः इत्यादौ चैत्रे तदर्थवृत्तेः समवायसंबंधेनान्वयबोधासंभवात्। नामार्थधात्वर्थयोरिव ना-
मार्थयोरपि अभेदातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वात्। अन्यथा घटः कर्मत्वमित्यादिनिराकांक्षस्थलावारणापि कर्मा-
तायामाधेयतासंबंधेन घटान्वयबोधप्रसंगात्। अत्र तद्बोधानुगमकत्वं नास्तीति तु न संभावनीयम्। स्वाद्यन्तत्वेन तस्यापि नामत्वात्।
तदाहुरभियुक्ताः। स्वाद्यन्तमिह नामेत्यभिसौदि। ज्ञानादिस्थलादौ तु कृतेर्ज्ञानानुकूलत्वाभावेन ज्ञानानुकूलकृत्याश्रयबोधा-
संभवात् तदाश्रये लक्षणावश्यकी। ननु ज्ञानादिस्थले तद्बोधे लक्षणांगीकारेऽपि कर्तृत्वादौ तत्र तु तादृशकृत्याश्रयबोधोऽ-
सकृत् किं तथा तोर्यत्वेन तथा इति चेन्न। तथा सति कर्तृसत्त्वस्य तु वैयर्थ्यापत्तेः। न स्यादेवं व्यर्थो तत्र सदा व्यापारकृत्याश्रय
इति बोधापत्तेश्च। न च तत्र कृत्यनुपदर्शनात् सर्वग्राहकमिति वाच्यं। प्रत्ययानां स्वार्थप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्प-
त्तेरिति। ननु कर्तृपदात् कृत्याश्रयबोधश्चेत् संभवति तदेव कृत्यौपल्यार्थकत्वमायाति तदेव तत्र सदा तत्क्रियाश्रयस्य
तदनुकूलव्यापारस्य वा बोधस्यैवांगीकारादित्येत आह। क्रियायाः इत्यादि। तथा च क्रियार्थत्वमभ्युपेत्य कर्तृपदात् क्रि-
याश्रयबोधांगीकारे क्रियाश्रयमात्रे कर्तृव्यवहारः स्यात्। तत्स्य क्रियानुकूलव्यापारार्थकत्वमभ्युपेत्य कर्तृपदात्
तादृशव्यापाराश्रयबोधांगीकारे च कारकमात्रे कर्तृव्यवहारः स्यात्। कारकमात्रस्यैव तथाविधव्यापाराश्रय-
त्वादिति भावः। कृञो व्यापारशक्तिवादिमीमांसकाः प्रसवति तिष्ठते। अव्येति। अंकुरः कृत इति प्रयोगस्य कृञोपला-
र्थकत्वेपि ईश्वरीयकृतिमादाय संभवेन तस्य व्यापारार्थकत्वे साधकत्वाभावात् आह। बीजादिनेति। तथा च कृञो व्यापारा-
र्थकत्वं विना बीजादिकरणकव्यापारजन्योऽङ्कुर इति बोधजनकस्य बीजादिनाऽङ्कुरः कृत इति प्रयोगस्यासंभवात्तस्य

रम
७

तदभिधायकत्वमाख्यातस्यैकमिति भावः। ननु तथा सति कारकमात्रे कर्तृव्यवहार अशक्यपरिहार इत्यत आह। कर्तृपदे चे
ति षष्ठ्यर्थे सप्तमी तस्याश्च घटकत्वमर्थः। पदपदं च वाक्यपरं। तथा कर्तृरूपवाक्यघटकस्य कृत्तीत्यर्थः। पदी
ति। वस्तुतः कारकमात्रस्य कर्तृपदार्थत्वे इति विरहः विवक्षातः कारकविभक्त्यो नानाभवन्तीति शाब्दिकव्युत्पत्तेरे
वातिप्रसंगभंजकत्वादिति भावः। ननु कृधातोरनंतसंयोगविभागद्विरूपव्यापारशक्तत्वापेक्षया लाघवाद्यत्नत्वा
शक्तत्वमेवोचितं। उपदर्शितस्थले च व्यापारलक्षणांगीकारेनानुपपत्तिरिति चेन्न। बहुषु स्थलेषु तथाप्रयोगाभा
वेन तत्र शक्तिग्राहकाभावात्। अन्यथा परपदात् लक्षणया कदाचित् घटबोधसंभवे न तस्यापि तत्र शक्तिकल्प
नं स्यादिति न किंचिदेतत्। कृधातोर्व्यापारबोधकत्वमवस्यमाख्यातस्यापि तद्बोधकत्वमवस्यापयति। एवं
चेत्। कृधातोर्व्यापारशक्तत्वेनाविवरणादेर्यत्नत्वविशिष्टे आख्याते शक्तिकल्पनाभावे चेत्यर्थः। अचेतनेपीति।
कर्षदावपीत्यर्थः। बाधकं विनेति। व्यापारे आख्यातशक्तिकल्पने बाधकं विनेत्यर्थः। गौरवाद्यायोगादिति। व्यापारे
आख्यातस्य लक्षणाकल्पनायाः अन्याय्यत्वादित्यर्थः। जनकव्यापारेति। शक्यतावच्छेदककोटौ जनकत्वांशानिवे
शानुपपत्तौ सादिवाक्यजन्यशाब्दबोधजनकत्वस्य प्रकारविषयत्वानुभवाभावाभिप्रायेण। तदर्थ इति। आख्यात
पदार्थ इत्यर्थः। नन्वत्र जनकत्वं पूर्वकालवृत्तित्वमात्रं शक्यतावच्छेदककोटौ निवेशनीयं। लाघवादित्यत आह। त
दुक्तेति। तथा चोपदर्शितापत्तिवारणार्थं गुरुत्वेप्यनन्यगतिकतयाऽनन्यथासिद्धनियतपूर्ववृत्तित्वरूपजन रु
कत्वस्यैवाख्यातपदशक्यतावच्छेदककोटौ निवेशनमुचितमिति भावः। नहीति। आख्यातस्य यत्नत्वविशि ७
ष्टवाचकत्वे इत्यर्थः। यत्नाविनाभूतेत्यादि। यत्नजन्यत्वव्याप्यः पाकादिक्रियाविशेषस्तेन हेतुना तत्कारणीभूत

स्यफलस्यानुमानादित्यर्थः। अत्र पाकादिक्रियाहेतुत्वोत्कीर्तनं च नात्रास्य संबंधस्य व्याख्यानाघटकसमभ्युपेत। तथा च पा
कफलजनकः पाकादिरनुमानात्पाके फलजनकत्वसिद्धिकालेऽन्यविच्छिन्नवेधतया फले विपाकजन्यत्वासिद्धेरा
पचतीत्यादौ पाकजनकफलानुकूलभवन्निर्वाह इति भावः। ननु आख्यातस्य व्यापारवाचकत्वे पचती सूतरं पाक
जनकफलवानिति विवरणासंगतिरित आह पचतीति। तात्पर्यविवरणमिति। तात्पर्यविषयीभूतार्थवि
वरणमित्यर्थः। न च पादत्राकयोर्बोधस्य पदात्शक्तिलक्षणान्यतररूपत्वसापादत्रार्थबोधः एवं तस्य तात्पर्य
विषयीभूतः प्रकृते पचतीत्येतदेव वाक्यघटकीभूतपदात् सोपस्थितो बोधे कथं तत्र तात्पर्यविषयत्वमिति वाच्यं।
धर्मोऽस्तीति वाक्यस्य तत्प्रयोज्यानुमितिविषयीभूतस्य हि तात्पर्यकत्ववत्पचतीत्यादिवाक्यस्यापि स्वप्रयो
ज्यानुमितिविषयीभूतफलतात्पर्यकत्वसंभवात्। तात्पर्यं चास्माच्छब्दादयमर्थो बोधो भवत्विच्छत्यादिवाक्ये
नाभिलाप्यमानाए तच्छब्दप्रयोज्यकत्वप्रकारकेतदर्थबोधोत्पत्तीच्छा इति। ननु विवरणस्य परंपरा
तात्पर्यविषयीभूतार्थपरत्वकल्पने सर्वत्र तात्संभवेन शक्तिग्राहकत्वमनुपपन्नं स्यादित्यत आह। अन्य
थेति। अनन्यलभ्यार्थस्यापि विवरणात्शक्तिकल्पने इत्यर्थः। तथा च यत्रान्यलभ्यत्वं नास्ति तत्रैव विव
रणस्य शक्तिग्राहकत्वमायातीति भावः। एवमिति। तत्रोपदर्शितानुमानेन पाकजनकफलानुभवाने वहि
पीत्यर्थः। फलस्येति। पाकजनकफलस्येत्यर्थः। नन्वनुमानादुपस्थितेतथाविधफलेआख्यातोपस्थि
पितवर्तमानत्वस्यान्वयः कालिकोबोधोऽनुपपन्न इत्यत आह। तस्येति। अपदार्थत्वात् पदानुपस्थितत्वात्।

रा०म

८ तथा च पदानुपस्थितार्थस्य शाब्दबोधाविषयत्वनियमेन तथा कल्पनायाः असंभवादिति भावः। ननु तत्र यत्नबोध
कपदं अध्याहार्यं तथा बोधो गीकार्य इत्यत आह। अन्यत्रेति। जानाती- रथ्योगधनीत्यादावित्यर्थः। वस्तुसन्त्वादि
४ ति। शाब्दबोधपदजन्यपदार्थोपस्थित्योस्तादृशकार्यकारणभावसिद्धत्वादित्यर्थः। तथा च जानातीत्यादौ आश्रयत्वेव
र्त्तमानत्वान्वयवारणाय विशेष्यतावच्छेदकतासंबंधेनाश्रयत्वोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञानजन्य
वर्त्तमानत्वप्रकारकशाब्दबोधं प्रति प्रकारतासंबंधेन ज्ञानादिधात्वनिरूपितवृत्तिज्ञानजन्योपस्थितेर्हेतुत्वकल्पनेन
रथ्योगधनीत्यादौ धात्वर्थे वर्त्तमानत्वान्वयवारणार्थं विशेष्यतावच्छेदकत्वसंबंधेन व्यापारोपस्थापकाऽख्यात
पदनिरूपितवृत्तिज्ञानजन्यवर्त्तमानत्वशाब्दबोधं प्रति आख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारता
संबंधेन हेतुत्वकल्पनेनात्राऽध्याहृतपदार्थे यत्नेवर्त्तमानत्वान्वयेबोधासंभव इति भावः। ननु व्यापारोपस्थापकाऽ
ख्यातपदज्ञानजन्यवर्त्तमानत्वप्रकारकशाब्दबोधं प्रति यत्नपदजन्योपस्थितेरपि विशेष्यतासंबंधेनातिरि
क्तहेतुत्वकल्पनानुपपत्तिरिति चेत् न। एतादृशातिरिक्तकार्यकारणभावकल्पनापेक्षयाऽऽख्यातस्य यत्नत्ववि
शिष्टएव शक्तिकल्पनाया एव लघीयस्त्वात्। नन्वेवं कालः पाकजनकवर्त्तमानयत्नवान् पाकजनकव्यापारव
त्वादित्यनुमानास्य चैत्रः पाकजनकवर्त्तमानयत्नत्वानुभवोपपत्तिरित्याशंक्य निराकरोति। न चेति। यत्नविगमेऽपीति। तथा
च व्यभिचारात् व्याप्तिग्रहासंभवेन तथाविधानुमितिर्न संभवतीति भावः। ननु तथाविधवर्त्तमानयत्नविशिष्टकालि[illegible] रु०घ
लिकसंबंधेन तादृशव्यापारस्य हेतुत्वमंगीकार्यं इति नोक्तानुपपत्तिरित्यत आह। धर्मिविशेषेति। चैत्रादियत्नक्रि ८

वर्त्तिना चेत्यर्थः। ननु चैत्रस्तथाविधवर्त्तमानयत्नवान् तथाविधव्यापारवत्त्वादित्यनुमानाच्चैत्रे वर्त्तमानयत्नानुभव
निर्वाहो भविष्यतीत्यत आह तच्छरीरेति। तथाविधयत्नाधिकरणकाष्ठादिव्यापारस्यापीत्यर्थः। चैतन्या
विनाभूतेत्यादि। चैतन्यव्याप्येत्यर्थः। इदं तु स्वरूपकथनपरं। नैहेतुतावच्छेदककोटौ निविष्टं तस्यानिवेशप्रयो
जनाभावात्। शोभनादेरित्यादि। न च सौदर्य्यपरपर्यायशोभनत्वविशिष्टतथाविधव्यापारस्यैव तत्र तथाविधवर्त्त
मानयत्नत्वानुमापकत्वमुपेयमिति वाच्यं काष्ठादावपि सौदर्य्यसंभवेन तथाविधविशिष्टहेतुसंभवात् व्यभिचारस्य दु
र्वारत्वात्। यत्तु। तथाविधयत्नविशिष्टसमवायादेर्हेतुतावच्छेदकसंबंधत्वाभ्युपगमान्न व्यभिचारावकाश इति लेशा
।त् तदसत्। तस्य संबंधताया प्रमाणाभावात्। पचतीत्यादौ सर्वत्र तत्संबंधघटितव्याप्तिग्रहस्यैव प्रमाणाभावाच्च। तत्राख्या
तस्येति। पचतीत्यत्राख्यातस्य जनकत्वलक्षणायाः अंगीकार्य्यत्वादित्यर्थः। घैलौवेनेति। अनन्यथासिद्धनियतोत्त
रवर्त्तित्वरूपजन्यत्वात्मकस्य व्यापारवत्त्वस्याख्यातपदशक्यतावच्छेदककोटिप्रवेशे गौरवात्तदपेक्ष्य कार्य्यसामा
न्यजनकतावच्छेदकत्वेनासिद्धत्वाः यत्नत्वजातेरेव तच्छक्यतावच्छेदककोटिनिवेशेन स्योचितत्वमिति भावः। ननु स
र्वमिदं संभवति जन्यत्वस्याक्तरूपत्वे तदेव न तस्यातिरिक्तत्वांगीकारात् तथा चातिरिक्तजन्यत्वात्मकव्यापारवत्त्वस्या
ख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वेन न किंचिद्बाधकमुत्पश्याम इत्यत आह साधकं चेति रथो गच्छतीत्यादौ लक्षणा
पाः अकल्पनमिति चेत्। सत्त्वं व्यापारत्वस्याख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वेन तत्संयोगविभा
गादिरूपजन्यसामान्य आख्यातपदशक्यत्वकल्पने गौरवात् तदपेक्ष्य यत्नमात्रे तद्धातोः कल्पने लाघवमस्या

शम
६

तिस्फुटत्वात्। घटत्वस्यापि व्यापारतया तत्र नं शक्तिकल्पनस्य व्यापारसामान्ये शक्तिसंकल्पने व्याप्यकत्वात्। केचि
त्तु। आख्यातस्य समवायमात्रे शक्तिः। समवायत्वं शक्यतावच्छेदकं। यत्न इति रिक्तं। मुख्यप्रयोगश्चरत्यो गच्छतीत्या
दौ। पचतीत्यादौ च जनकयत्ने लक्षणेत्याहुः। तदपि न सम्यक्। अनंतसमवाये तच्छक्तिकल्पने गौरवात्। न च सम
वायस्यैकतया न गौरवमिति वाच्यं। लाघवं चानंतयत्नशक्तिकल्पनापेक्षया स्फुटमेवेति वाच्यं। एकस्मिन् समवाये आ
ख्यातस्य शक्तिकल्पने केवलं चैत्रस्य घटं दृष्टा न न तादृशप्रयोगाच्चैत्रो घटं जानातीति वत् मैत्रो घटं जानातीति प्रयो
गापत्तेः। भवन्मते आत्मत्वादिसमवायापेक्षया ज्ञानादिसमवायस्य वैलक्षण्याभावेना ऽस्मा(?) ज्ञानादिसमवा
यमति मैत्रात्मनि ज्ञानाभावदशायामपि ज्ञानसमवायसत्त्वात्। यदि चाऽऽख्यातपदार्थसमवायान्वयेन तदा
त्मनिरूपितत्वविशिष्टरूपसंबंधत्वमंगीकृत्य तदुक्तबाधकोद्धारः संभाव्यते। तथापि तिरिक्तसमवायत्वमा
ख्यातपदशक्यतावच्छेदकमुत तन्मात्रविशेष्यककल्पनादिकमिति। अत्र विनिगमनाविरहेण गौरवं दुर्द्धरमेव।
यत्नशक्तिवादिमते तु यत्नत्वस्य जातितया तद्वितरस्य यत्नसामान्यसाधारणस्य गौरवेण शक्यतावच्छेदकत्वस्या
संभवदुक्तिकतया लाघवस्य बहुत्वेऽपि अकर्त्तरि वारणीयत्वमेवेति सुधीभिरन्यत्स्वयमूहनीयं। शंकते यत्नं वि
हायेति। लाघवादिति। जनकयत्नशक्तिवादिनां जनकांशे शक्तिकल्पनस्यावश्यकतया जनकशक्ति
वादिमते तदतिरिक्ते शक्त्यकल्पनेन लाघवसंभवादित्यर्थः। तथाचेति। जनकमात्रे शक्तिकल्पने त्वेत्यर्थः।
अचेतनेपीत्यादि। रथो गच्छतीत्यादौ गमनजनकनोदनाख्यासंयोगादेः रथादौ सत्त्वेन आख्यातस्य शक्तौ तथा
प्रयोगसंभवेन तत्राश्रयत्वादौ लक्षणाकल्पनापि नास्ति। अपचत्सपीति। तत्र चासाधारणजनके शक्तिस्वीकार

६

रणीया। अदृष्टस्य साधारणकारणत्वात् तद्वति पाककर्त्रन्यपुरुषे न पचतीति प्रयोगापत्तिरिति वाच्यं। गौरवात्। न
नु पाकजनकादृष्टजनककृतेरपि पाकजनकतया पाकादिगोचरकृतिकाले पि पचतीति प्रयोगापत्तिरि
ति शंकां वारयति। केवलजनकादृष्टजनकेति। मानाभावादिति। तस्य पाकादिजनकादृष्टजनककृतेस्तज्ज
नकत्वे प्रमाणाभावादित्यर्थः। हिंसादिरित्यादि। हिंसेति: सकर्तृकाकार्यत्वादीश्वरानुमाने इत्यर्थः। तज्ज
नकेति। हिंसादिजनके इत्यर्थः। अर्थान्तरप्रसंगो वेति। इदमापाततः। तस्य सकर्तृकत्वस्य अदृष्टद्वारककृ
तिजन्यत्वार्थकेन यथानुपपत्तेः मानाभावादिति। ननु कृतीष्टसाधनतायाः विध्यर्थत्वादिसौ हृलभमेतज्जनकादृष्ट
जनककृतेरपि तज्जनकत्वस्य वेदबोधितत्वेन दुरपह्नवत्वात्। कथमतिप्रसंगो वारणीय इत्यत आह। भावे चेति।
तज्जनकादृष्टजनककृतेस्तज्जनकत्वे प्रमाणसद्भावे चेत्यर्थः। तादृशकृतिवारणायेति। तादृशकृतिकाले
तथाविधप्रयोगवारणायेत्यर्थः। तथापीति। जनकमात्रेत्याशिक्षावादिनापीत्यर्थः। ननु जनकेनेत्यत्र आख्यात
स्य शक्तिकल्पने शक्यतावच्छेदकगौरवात् तदपेक्षया केवलयत्नत्वविशिष्टशक्तिकल्पनस्यैवोचितत्वात् तथो
वाह। यत्नमात्रमिति। यत्नत्वविशिष्टमात्रमित्यर्थः। न चाख्यातस्य यत्नमात्रवाचकत्वे आख्यातपदयत्न
पदयोः पर्यायतापत्तेः। तच्छक्यतावच्छेदकावच्छिन्ने तस्य तत्पर्यायितापदार्थत्वादिति वाच्यं। इष्टत्वात्।
ननु विषयत्वस्य धात्वर्थसंसर्गताभ्युपगमे पाकानुपधायककृतिपाकगोचरयत्नवति पुरुषे पचतीति प्रयो
गापत्तिरत आह। जनकत्वं चेति। फलोपधायकत्वं चेत्यर्थः। फलोपधायकत्वं च तत्तद्घटितत्वावच्छिन्ना

राम
१०

जनकत्वमतिरिक्तं वैसन्यदेतदिति भावः । वैयाकरणमतमाह । कर्तृकर्मणी तिङ् लकारवाच्ये । आख्यातवाच्ये इतीति । इ
सप्तम्यर्थः । सामानाधिकरण्यात् तथा इति । नामाख्यातयोरेकधर्मिबोधकत्वरूपसामानाधिकरण्यबोधस्यानु
भवसिद्धत्वादित्यर्थः । नन्वेतादृशानुभवे मानाभावादित्यत आह । अन्यथेति । कर्त्राख्यातकर्माख्यातयोः कर्तृ
कर्मणोरनभिधायकत्वे इत्यर्थः । नयोरिति । द्वितीयातृतीययोरित्यर्थः । अनभिहिताधिकारीयत्वा- यत्वादिति ।
कर्तृकर्मानभिधायकाख्यातसमभिव्याहारेऽभिहितत्वादित्यर्थः । यत्राख्यातेन कर्ता नाभिधीयते तत्र तृतीया । यत्राख्याते
न कर्म नाभिधीयते तत्र द्वितीयेति मुनित्रयसंमतेरिति भावः । नन्वाख्यातस्य कर्त्रभिधायकत्वानभिधायकत्वे एव द्विती
यातृतीययोर्नियामके स्तस्तथा च यदर्थमाख्यातस्य कर्त्राद्यभिधायकत्वमिष्टमत आह । रूसभिधानस्येति । अविशि
ष्टत्वादिति । कर्माख्यातसाधारणत्वादिति भावः । तथा च नैयायिकनये कर्माख्यातस्यापि कृतिवाचकत्वे यातत्र तृती
या न स्यादिति भावः । ननु यो नैयायिकनये कर्माख्यातस्य कर्मत्वार्थकतया कर्मत्वे न तदिति वाच्यं । प्राचीननैयायिकनये
एवं तदभिधानात् । स्फुटीभविष्यति चेदुपरिष्टादिति । संकेतो कर्तृकर्मत्वादि । नियमः । द्वितीयातृतीययोरसंदेहपयोऽश्च
नियम इत्यर्थः । यत्र धातूत्तरप्रत्ययेन कर्तृगतसंख्याभिधीयते तत्र कर्तरि न तृतीया । यत्र कर्तृगतसंख्या नाभिधीयते त
त्र कर्तरि तृतीया । एवं धातूत्तरप्रत्ययेन कर्मगतसंख्यानभिधीयते तत्र कर्मणि द्वितीयेति भावः । तेन यत्र कर्मगतसंख्या ना
भिधीयते तत्र कर्मणि न द्वितीयेति भावः । चैत्रेण घटो दृष्ट इत्यादावपि । ननु सुपः संख्याभिधायकत्वे चैत्रो रूपं जानाति रूपा रू.छ
हरणं सत्का चैत्रेण स्नेहदृष्टो घट इत्यस्मावत् दूरपर्यन्तानुधावनमफलमिति वाच्यं न हि क्रियारहितवाक्यमस्तीति १०

-प्यायेन चैत्रोऽध्वपचानिसादौ गच्छतीति क्रियामध्याहृत्य सति तिङेव सर्वत्र संख्याबोधकत्वसंभवेनालं सुपः संख्याभिधायकत्वेनेति चे-
न्नातिप्रसङ्करणासंभवेन सुपः संख्याभिधायकत्वे सक्रियतथाविधकाव्यपर्यन्तानुधावनस्यानेककल्प्यादिति। कूपे ह्रदे ऽजः सु-
पवेति। अवन्त्यसंख्याकूपे ह्रदे ऽजः सुपपदादिसमर्थः। न तदभिधायकत्वमिति। अन्न संख्याभिधायकत्वमिसमर्थः। तथा च देवदत्तो
गच्छतीत्यादाव पितिङः संख्यानभिधायकत्वेन तृतीयास्यादिति भावः। नादत्तं सुपमिति। द्वित्वादिसंख्याबोधकं सुप्पदमिसमर्थः।
द्वित्वादिप्रसङ्ग्यादिति। तथा च तत्र द्वित्वबोधानुपपत्त्यातिङोऽपि संख्याबोधकत्वमिसमर्थः। परन्तु। चैत्रो मैत्रश्च गच्छतः इत्यादौ मैत्र-
पदोत्तरसुब्विभक्तेः द्वित्वाद्वित्वाबहुत्वानवकतया द्वित्वादिबोधसंभवेऽतिङः संख्याभिधायकत्वेन निर्युक्तिकमिति। तदभ्रं दूषयं। विनि-
गमनाविरहेण तत्र पदोत्तरसुब्विभक्तेर्विद्वित्वबोधस्यानन्वयकत्वे चैत्रश्च दृश्यं मैत्रश्च दृश्यं मैत्रश्च दृश्यं च गच्छत इत्यापत्तेर्दुर्वारत्वात्। न
त्रैकवचनैकपदस्थितैकत्वान्वितचैत्रादौ कथं तिङुपस्थाप्यद्वित्वादेरन्वय इति तु नाशङ्कनीयं। तत्रैकत्वस्याविवक्षितत्वादिति।
ननु तथाप्युपदर्शितरीत्या तिङो द्वित्वाभिधायकत्वमस्तु। एकत्वाभिधायकत्वं तु तस्य निर्युक्तिकमित्याशङ्कामपाकर्तुमाह।
लाघवादेकवचनत्वादिनैवेति। तथा चैकवचनत्वविशिष्टसुप्त्वस्यैकत्वशक्तताविच्छेदकत्वकल्पने गौरवात्तदपहाय एकव-
चनत्वेनैवशक्तताविच्छेदकत्वकल्पनमुचितं। एकवचनत्वं चाभियुक्तैरेकत्वैकवचनत्वेन पारिभाषितत्वं तत्तद्वित्वादिसाधारणमिति
तिवादेरप्येकत्वबोधकत्व----मिति भावः। केचित्तु। पचतीत्यादावाख्यातपदोल्लेखनायाश्चार्थवाध्याहृत्य कर्तृबोधेऽपि तत्र
नियमतः एकत्वबोधस्यानुभवसिद्धत्वात्तिप एकत्वबोधकत्वमावश्यकं। न च तत्राख्यातस्यैवपकत्वविशिष्टकर्त्रादिलक्ष-
णेति वाच्यं। नियमतः प्रतीयमानेऽर्थे लक्षणाकल्पनेऽयुक्तत्वाद्व्याख्यातृनां निरूढकल्पनस्य निर्युक्तिकत्वं। लक्षणैव तु
त्रयत्वबोधकसंभवादित्याहुः। कर्तृकर्मसंख्याभिधानानभिधानाभ्यामित्यारभ्य नासौ स्तेन संख्यापर्यायोपरिवै

याकरणः समाधत्ते। कृतेसादि। तथा सु चेपू लिभक्तिं विना बहुत्वस्यावस्थानासंभवात्तत्त्वस्य वोतरसु वएव संख्यावोधसं
भवेन कृतः संख्यावोधकत्वं निर्युक्तिकं वा। न च विनिगमनाविरह इति वाच्यं। एकवचनत्वेन सुपस्तत्र त्राकेरन्यत्र कृप्त
त्वात्। एवं चैत्रो ग्रामं गतवानित्यादौ गामिधौ तू तरकृत्प्रत्ययस्य संख्यानभिधायकत्वेन तृतीयापत्तेर्नु सरणोप्यन्या कथवा
रणत्वादिति भावः। ननु यत्राख्यातेन कर्तृगतसंख्याभिधीयते तत्र प्रथमा। यत्र च तेन कर्मगतसंख्याभिधीयते तत्र
तृतीयेत्यादि नियमो वाच्यः। कृत्प्रत्ययस्थले च कर्त्रादेरभिधानानभिधानाभ्यां। तथा च तत्र न कोपि दोष इति चेत्। आ
ह। किं चेति। न नियम इति। कर्त्राख्यातेन कर्तृगतसंख्यैवाभिधीयते। न तु कर्मगतसंख्या। एवं कर्माख्यातेन क
लो र्मगतसंख्यैवाभिधीयते। न तु कर्तृगतसंख्येति नियमाभावादित्यर्थः। ननु तादृशनियमलाभे का क्षतिरित्य
त आह। पदार्थतावच्छेदकावच्छिन्नस्येति। एकत्वत्वावच्छिन्नस्येत्यर्थः। आकांक्षादिवशात्। एकत्वत्वावच्छिन्ननिरूपि
तशक्तिवशादित्यर्थः। तथा च चैत्रो ग्रामं गच्छतीत्यत्राख्यातेन कर्मगतसंख्याबोधने बाधकाभावेन तत्राकर्मणि प्र
थमास्यात्। एवं चैत्रेणौदनः पच्यत इत्यत्राप्याख्यातेन कर्तृगतसंख्याबोधने बाधकाभावेन तत्रापि कर्तरि प्र
थमापत्तेरिति भावः। न च कर्त्रैकवचनत्वावच्छिन्नस्य कर्त्रैकत्वत्वं शक्यतावच्छेदकं। एवं कर्मैकवचनत्वावच्छिन्न
स्य कर्मैकत्वत्वं शक्यतावच्छेदकमिति वाच्यं। तथा च शक्यतावच्छेदकशक्यतावच्छेदकभेदान्न सर्वत्र कर्तृकर्मसाधारणैक
त्वबोध इत्यत आह। कर्मैकत्वत्वादिनाऽभिधानेऽपीति। कर्त्रैकत्वत्वादिना। कर्त्रैकत्वादौ कर्त्रैकवचनत्वावच्छिन्नादेः
शक्तिकल्पनेऽपीत्यर्थः। आदिना कर्मैकत्वत्वादिपरिग्रहः। अभिधेयत्वं। शक्यतावच्छेदककोटिप्रविष्टत्वं इदमु

पलसत्वं। कर्त्रादिपदस्याविच्छिन्नतावच्छेदककोटिप्रविष्टत्वमित्यपि बोध्यं। ननु एतेन किमायातमित्यत आह। शाब्दवि
षयादि। शाब्दविषयस्य भोरवमित्यस्य स्वघटितत्वेनेत्यन्वयः। तथा च कर्त्रादिघटितधर्मविशिष्टेच्छा। किं कल्पनेन न घटितधर्मस्य
शाब्दतावच्छेदकत्वकल्पनेन च महद्गौरवं नैयायिकमते। वैयाकरणमते तु एकत्वादिनाकाङ्क्षिता एकवचनत्वादिना च
कर्तृत्वेन तद्बोधो भवतीति स्फुटमिति भावः। वैयाकरणमतमुपसंहरति। तस्मादिति। तत्तद्रूपेणेति। तत्त्वादिनावेत्यर्थः।
न चैवं सति वैयाकरणमते कथं न तत्राख्यातस्थले कर्मादौ संख्यान्वय इत्यत आह। एकपदेति। कर्त्रादिसंख्ययोरेका
ख्यातपदोपस्थाप्यत्वादित्यर्थः। तथा चैकपदोपस्थाप्यानामर्थानामन्वयबोधके एकत्रापरान्वय इति नियमेन। ए
तेन एकत्वादिनिष्ठप्रकारतानिरूपितकर्तृनिष्ठविशेष्यतासंबंधेन कर्त्राख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्र
ति कर्त्राख्यातपदजन्यकर्तृपस्थितेर्विशेष्यतासंबंधेन हेतुत्वस्य। एवं एकत्वादिनिष्ठप्रकारतानिरूपितकर्मनिष्ठवि
शेष्यतासंबंधेन कर्माख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति कर्माख्यातपदज्ञानजन्यकर्मोपस्थितेर्वि
शेष्यतासंबंधेन हेतुत्वस्य कल्पनीयतया न तत्राख्यातस्थले कर्मादौ संख्यान्वय इति भावः। ननु कर्त्राख्या
तत्वेन कर्माख्यातत्वेन पदाभावेन शक्तिकल्पने चैत्रः पच्यते तंडुल इत्यादिप्रयोगापत्तिः। तत्राख्यातस्याख्यातत्वेन
कर्तृत्वेन शाब्दतया कर्त्रुपस्थितिसंभवेनाख्यातत्वेन तस्य कर्मशक्ततया कर्मणोऽप्युपस्थितिसंभवेन तयो
स्तत्र चैत्रतंडुलादौ अभेदसंबंधेनान्वयबोधे बाधकाभावादित्यत आह। कर्तृकर्मेति। एकदा उभयमसन्नमिति।
एकस्मिन्काले एकस्या[illegible] नि समित्यर्थः। तथा च तदाख्यातपदजन्यकर्तृत्वप्रकारककर्तृशाब्दबुद्धित्वावच्छि

न्नं प्रति कर्मबोधगृहीतताख्यर्थकतदाख्यातपदजन्यज्ञानत्वादिना। एवं तदाख्यातपदजन्यकर्मत्वप्रकारककर्मविषयकशा
ब्दबुद्धित्वावच्छिन्नं प्रति कर्तृबोधगृहीतताख्यर्थकतदाख्यातपदजन्यत्वादिना च प्रतिबंधकत्वस्य कल्पनीयतया नैकदा
एकाख्यातपदात् कर्तृकर्मणोर्बोधापत्तिरिति भावः। केचित्तु। तदाख्यातजन्यकर्तृत्वप्रकारककर्तृविषयकशाब्दबुद्धि
त्वावच्छिन्नं प्रति कर्मत्वबोधकसुप्विभक्तिसमभिव्याहृतधात्वनुसमभिव्याहृततदाख्यातपदज्ञानकर्त्रुपस्थितेः। ६
एवं तदाख्यातपदजन्यकर्मत्वप्रकारककर्मशाब्दबुद्धित्वावच्छिन्नं प्रति च तृतीयान्तपदसमभिव्याहृतधात्वनुपदसमभि
व्याहृततदाख्यातपदज्ञानजन्यकर्मोपस्थितेश्च हेतुत्वस्य कल्पनीयतया नैकदा एकाख्यातपदात् कर्तृकर्मणोर
न्वयबोधः चैत्रः चैत्रेण तंडुलं तंडुलः पच्यते इत्यादिप्रयोगे च दृष्टापि तेषां नाव्यस्यान्वयबोधे कस्याप्यविवादा
दित्याहुः। ननु प्रदर्शितरीत्या मैत्रः पच्यते तंडुलमित्यादिप्रयोगवारणेऽपि मैत्रः पच्यते तंडुलमित्यादिप्रयोगापत्तिर्दुर्वारैव ।
तत्र कर्मताबोधगृहीतताख्यर्थकाख्यातपदज्ञानाभावात्। कर्मताबोधकसुप्विभक्तिसमभिव्याहृतधात्वनुसमभिव्याहृ
तपदजन्यकर्मोपस्थितेः सत्त्वाच्च कर्तृबोधे बाधकाभावादित्यत आह। कर्तुरिति। तथा च कर्तृत्वप्रकारककर्तृशाब्दबु
द्धिजनकतावच्छेदककोटौ आख्यातपदांशे योगाद्यसमभिव्याहृतत्वमपि निवेशनीयमिति नोपदर्शितप्रयोगापत्तिरि
ति भावः। नैयायिकः प्रसक्तं निषेधति। अत एवेति। नैयायिकनये लाघवसिद्धत्वात् इत्यादिना वाक्यतावच्छेदकाख्यात
पदे उक्तानुक्तविभागमूलकं कर्तृकर्मैकगतसंख्याभिधानाविधानकं कर्तृकर्मसाधारण्येन संख्याबोधापादनं
निराकर्तुमाह। भावनाविशेष्य इति। समानपदोपात्तत्वेनेति। एकपदोपस्थाप्यत्वेनेत्यर्थः। एकान्वयित्वस्य बाध
कं विना नियमसिद्धत्वादित्यर्थः। नन्वेकपदोपस्थाप्यानामेकार्थान्वयित्वनियमोऽप्रयोजकस्तदुपेक्षणी

यइति चेन्नैवं। तथाविधनियमस्वीकारेणाप्यवश्यैवप्रयोजकत्वसंभवात्। तथाहि। आख्यातपदोपस्थाप्यभावनात्वैकार्थ्यस्या
न्वयबोधार्थमवश्यपदार्थान्तरनैरपेक्ष्येणोपस्थितिकल्पनमावश्यकं। अन्यथा पदार्थान्तरस्य वैयर्थ्यादेः। पदजन्योपस्थित्यभावेन
न्वयबोधे पदजन्योपस्थितत्वभावनान्वयानुपपत्तेः। तथा च संख्याया अतिचैत्राद्यन्वयः स्वीकारे पदांतरेणोपस्थित्यंतरकल्पनप्र
गुरुलाघवमतिस्फुटमेवेत्युक्तनियमाभ्युपगमः। न चोक्तनियमाभ्युपगमे पचेतेत्यादौ कृतिसाध्यत्वान्वितपाकेसंख्या
न्वयापत्तिरिति वाच्यं। आख्यातपदज्ञानजन्यसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदजन्याख्यातपदार्थ
भावनाविशेष्योपस्थितेर्विशेष्यतासंबंधेन हेतुत्वस्य कल्पनीयतया उपदर्शितापत्तेरभावात्। न च तथाप्युपदर्शितानि
यमभंगप्रसंग इति वाच्यं। अन्यथानुपपत्त्या तादृशनियमे कृतिसाध्यत्वेष्टसाधनत्वाद्यतिरिक्तत्वेनैकपदोपस्थाप्य
त्वस्य विशेषणीभूतत्वादिति सारं। ननु भावनैव कुत्रान्वेति कुत्र नेत्यत्र किं नियामकं तत्र हि। भावनायाश्चेत्यादि। अन्वययो
ग्य इति। तथा चान्वयः कार्यकारणभावसिद्ध इत्यर्थः। तथा च तत्र कर्मत्वाद्यनवरुद्धप्रथमांतपदोपस्थाप्ये एवाख्याता
र्थभावनायां विशेष्यत्वेनान्वययोग्यत्वस्य कार्यकारणभावसिद्धतया अन्यत्र भावनान्वयविरह इति भावः। ननु कीदृश
कार्यकारणभावासिद्धस्तथान्वयस्तत्राह। तथैवेति। भावनानिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन आख्यातप
दज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन प्रथमांतपदज्ञानजन्यकर्मत्वाद्यनवरुद्धार्थत्वविशेष्यकोप
स्थितित्वेनेत्यर्थः। साकांक्षत्वादिति। शाब्दबोधपदजन्योपस्थित्योः कार्यकारणभावकल्पनादित्यर्थः। तथा च ता
दृशकार्यकारणभावबलात् तथाविधप्रथमांतपदोपस्थाप्ये भावनायाः विशेष्यत्वेनान्वयनियम इति भावः। ननूपद
र्शितकार्यकारणभावे कारणतावच्छेदककोटौ कर्मत्वाद्यनवरुद्धत्वं विशेषणं व्यर्थं। यदि च कर्मत्वाद्यनवरुद्धत्वं

राम
१३
13

विशेषणतांशे मिलितवैरूप्य तथाविधान्वयबुद्धिं प्रति प्रथमान्तपदजन्योपस्थितेर्हेतुत्वे चंद्र इव मुखमस्तीत्यादौ प्रथमान्तपदोपस्थि
तिविषये चंद्रे सादृश्यस्यैव भावनायाः अन्वयप्रसंगस्तदा प्रकृतशाब्दबोधे इह विशेषणत्वार्थकं कर्मत्वाघनवरूढत्वं त
त्रकारणतावच्छेदककोटौ निवेशनीयमिति विभाव्यमेतेन व्यापि तत्र यदि प्रथमान्ते विशेषणांश्यर्थमेव। द्वितीयान्तपदजन्योप
स्थितिविषयीभूतार्थस्य शाब्दबोधे कर्मत्वविशेषणतया इतरविशेषणत्वविरहादेव तत्र भावनायोः अन्वयबोधाव
तिवारणसंभवात्। एतेन भावनाविशिष्टप्रकारता निरूपितविशेष्यतासंबंधेनाख्यातपदजन्यशाब्दबु
द्धित्वावच्छिन्नं प्रति प्रथमान्तपदजन्योपस्थितेर्विशेष्यतासंबंधेन हेतुत्वं कल्पते। ननु कर्मत्वाघनवरूढत्वमपि
तत्र निविशते तस्य निर्वचनाशक्यत्वात्। चैत्रेण प्रकृतशाब्दबोधे इतरविशेषणत्वमेव तत्र। प्रकृतत्वे च प्रथमान्तेतरपद
जन्यत्वमिति वाच्यं। चंद्र इव मुखं चंद्रो राजते इत्यादिवाक्यद्वयजन्यसमूहालंबनबोधे चंद्रे भावनान्वयबोधानुपपत्तेः। न च
प्रथमान्तपदजन्यशाब्दबोधे विशेष्यताभावत्वहेतितथाविधशाब्दबोधे इतरविशेषणत्वमेव तन्निरिति वाच्यं। तथान्यता
शौ हेधर्मस्योपदर्शितकारणतावच्छेदककोटौ निवेशोपरस्परं विशेषणविशेष्यभावे विनिगमनाविरहोहे कार्यकार
णभावबाहुल्यस्य दुष्परिहारत्वात्। तथा विधान्वयबुद्धिं प्रति स्वीयविशेष्यत्वाभावविशिष्टप्रकारतासंबंधेन शाब्दबोध
स्यैव कार्यकाले वृत्तितया प्रतिबंधकत्वकल्पनेमुचितं। तादृशप्रतिबंधकाभावादिवोकारणत्वकल्पिकाव्युत्पत्तिः कर्मत्वाघन
वरूढ इत्यादिग्रंथे न दर्शिता। तादृशव्युत्पत्तेन तथाविशेषणानुपादाने तादृशप्रतिबंधकाभावस्य हेतुत्वात् प्रत्यासंचंद्र इ रूढ
व मुखमस्तीत्यादौ चंद्रादिपदार्थे भावनाया अन्वयप्रसंग इति तदुपादानमित्यपि परास्तं। उपदर्शितप्रतिबंधका

भावस्य हेतुत्वेन तद्जन्यपदार्थोपस्थितिकारणतावच्छेदककोटौ पदांशे प्रथमांतत्वविशेषणे तु काशानस्य व्यर्थत्वात्तत्र तदुपादान
संपादकतया विधविशेषणस्य युज्यते इति विशेषप्रयोजनाभावादिति। ये मेवं तत्र तदनिवेशे द्वितीयाविभक्त्यंतोनेकपदेषु तथा
विधोपस्थितिनि[illegible]कारणतावच्छेदकत्वकल्पने गौरवात्। मन्मते प्रथमांततत्तद्दवकल्पनेमिति लाघवस्येवोपद
र्शितकारणतावच्छेदककोटौ पदांशे प्रथमांतत्व निवेशासंपादकतया उपदर्शितव्युत्पत्तावपि तादृशविशेषणस्यावश्यक
त्वात्। अन्यथा तदनुसारेणोपदर्शितविशेषणघटितकारणभावकल्पनायाः अयोगादिति। ननु भावनायाश्चैत्यादिग्रंथ
स्योपदर्शितरीत्या व्युत्पत्तिपरत्वे नैवेत्यादिग्रंथस्य कोर्थ इति चेत्। तमवेहि। तथैवेति। तादृशव्युत्पत्त्यनुसारेण तद्रूपेणो
वेत्यर्थः। तथा च अत्र तिबंधकाभावत्वता दृशपदजन्यत्वादिनैवेति तु निर्गलितार्थः। साकांक्षत्वात्। कार्यकारणभावस्या
कांक्षाविषयत्वात् कल्पनीयत्वादिति यावत्। तथा चोक्तव्युत्पत्त्यनुसारेणोपदर्शितकार्यकारणभावं कल्पयित्वा भा
वनायाः अन्वये नियम उपपादनीय इति भावः। उपदर्शितव्युत्पत्तौ किंमानमिति तु नाशंकनीयं। तत्रानुभवस्यैव शरणी
करणीयत्वात्। अन्यथा व्युत्पत्तिमात्रस्यैवोच्छेदापत्तेरिति। रूतं पल्लवितेन। तत्रैवेति। भावनाविशेष्यककर्त्तरि कर्मवेत्यर्थः।
ननु भावनाविशेष्यसंख्यान्वयस्वीकारे चैत्रेण सुप्यते इत्यादौ संख्यानन्वयापत्तिस्तत्र भावनाविशेष्यविरहात्। अतस्त
६ त्रइष्टापत्तिमाह। चैत्रेण सुप्यत इत्यादिना। प्रथमांतपदाभावादित्यस्य भावनाविशेष्यविरहादित्याद्यः। ग्रमतनेनूस
हान्वयः। नैन चैत्रेण सुप्यते इत्यादौ धात्वर्थस्य भावनाविशेष्यत्वेनान्वेतु। तथा च तत्रैव संख्यान्वयसंभवे किमर्थमु
पदर्शितस्थले संख्याद्यनन्वये इष्टापत्तिरसंगत आह। धात्वर्थस्येति। व्युत्पन्नत्वादिति। तथा भावनाविशेषणत्वेनैव धा
त्वर्थान्वय इति व्युत्पत्तिबलात्। सिद्धस्य चैत्रः स्वपितीत्यादौ स्वापादिनिष्ठप्रकारतानिरूपित×चे×विशेष्यतासंबंधेन तथा।

राम
१४

विधया क्वचनान्यत्राव्युत्पत्तिसावच्छिन्नं प्रति आख्यातपदजन्यभावनोपस्थितेर्विरोध्यतासंबंधेन हेतुत्वस्य कल्पनात् । चैत्रेण
सुप्यते इत्यादौ स्वापादेर्भिन्नतया विरोध्यत्वेनान्वयबाधकत्वमिति भावः । ननु भावनाविनिर्मोकेण तेनैव धात्वर्थान्वय इति यु
क्तं तेभ्यो वाख्यातस्थले संकोचः कल्पनीयः । भावाख्यातस्थले धात्वर्थस्यैव भावनाविरोध्यत्वेनान्वय इति युक्तं
नरमंगी [illegible] कार्यकारणभावांतरं कल्प्यमित्यत उपदर्शितले धात्वर्थविरोध्यकभावनाप्रकारकबोधांगीकारे इ
ति विरह इत्यत आह । भावनायाः बाधितत्वादिति । चैत्रेण सुप्यते इत्यादौ आख्यातार्थाश्रयत्वरूपायाः भावनायाः स्वो
पेक्षाः । न तत्रान्वयासंभवादित्यर्थः । ननु निरूपकत्वसंबंधेनैव तत्र स्वान्वयः संभवतीति चेत् । तथा सति चैत्रेण सुप्य
ते न मैत्रेणेत्यादौ नञर्थानन्वयापत्तेः । न च तत्र निरूपकत्वसंबंधावच्छिन्नप्रतियोगितयाकाश्रयत्वाभावस्य स्वान्वय
संभवान्न तत्र नञर्थान्वयानुपपत्तिरिति वाच्यं । एवमपि वामकसंयोगस्याभावप्रतियोगितासंबंध [illegible] वच्छेदकतया नि
रूपकतासंबंधावच्छिन्नप्रतियोगिकाश्रयत्वाभावस्यालीकतयासंभवेनोपदर्शितापत्तेर्दुर्वारत्वात् । चैत्रेण सुप्य
ते इत्यादौ एककालीनत्वादिसंबंधेन स्वापे आश्रयत्वस्यान्वय इति तु नांको स्वदर्शितमिति । तत्र तेन संबंधेनाश्रयत्वस्यान्वय
निराकांक्षत्वात् । मैत्रस्य ज्ञानं गृहद्वारायां चैत्राश्रयत्वमादायापि मैत्रेण सुप्यते इति प्रयोगसत्त्वाच्चेति । ननु तत्रैकवचना
र्थसंख्याया अनन्वये एकवचनं [illegible] इत्यत आह । एकवचनं त्वित्यादि । अतएव भावाख्यातस्थले एकवचनस्य साधुत्वात्
एवेत्यर्थः । औत्सर्गिकमिति । प्रथमोपस्थितमित्यर्थः । अन्यथा त्वेतस्यापादे संख्यायाः अन्वयस्वीकारे पक्षो द्विव
बहुत्वेपि भावाख्यातस्थले द्विवचनबहुवचनापत्तेस्तत्र दृष्टापत्तिर्न संभवति । अभियुक्तविरुद्धत्वादिति भावः । ननु रघु
भावाख्यातस्थले संख्याभावनयोः अन्वये भावविङं नैरर्थक्यमित्यत आह । एवं वेति । भावाख्यातस्थले १४

संख्याभावनयोरन्वये चेत्यर्थः। यथा पचति स्यादि। वर्तमानत्वं लडर्थः। इष्टसाधनत्वं लिङर्थ इत्यर्थः। इष्टसाधनत्वादि रित्यत्रा
दिपदग्राह्यमतीतत्वकृतिसाध्यत्वाद्यर्थकं। ननु लिङर्थेष्टसाधनत्वादेः लङर्थातीतत्वादेश्च कुत्रान्वय इत्यत आह। तद्धेत्वादौ। लिङ
र्थेष्टसाधनत्वलङर्थातीतत्वादिकं चेत्यर्थः। ननु तथान्वये मानाभाव इत्यत आह। तथैवेति। लिङादिसमभिव्याहारस्थले धातु
त्वार्थविशेष्यकेष्टसाधनत्वप्रकारकबोधस्यैवानुभवसिद्धत्वादित्यर्थः। इदमत्र मनवधेयं। चैत्रेण सुप्यते इत्यादौ वृत्तित्वमात्रं
यार्थः। वर्तमानत्वं भावतिङर्थः। धात्वर्थः स्वापः। चैत्रवृत्तिवर्तमानस्वाप इत्यन्वयबोधः। एवं चैत्रेण सुप्यत इत्यादौ भावलिङः इ
ष्टसाधनत्वादिकमर्थः। तथा च चैत्रवृत्तिस्वापः इष्टसाधनं कृतिसाध्यश्चेत्याकारकान्वयबोधः। एवमन्यत्रापि सूक्ष्मदृशि
भिरूहनीयमिति। वर्तमानत्वाद्यबोधकानामित्यर्थः। ननु भावनायाः प्रथमान्तपदोपस्थाप्यकेन संबंधेनान्वयः। नतो
वृत्ताश्रयतासंबंधेन। चैत्रेण पच्यते तंडुल इत्यत्र तंडुले आख्यातार्थकृतिरूपायाः भावनायाः बाधितत्वादित्यत आह।
भावनायाश्चेति। आश्रयत्वेन। आश्रयत्वसंबंधेनेत्यर्थः। अन्वयेऽपीति विशेष्यमात्रपरत्वे इत्यर्थः। तथा च सोऽपि स्वरं परत्वा
वा भावनाविशेष्य एव संख्यायाः अन्वयनियम इति भावः। न च संख्याघटितरीत्याख्यातार्थमात्रस्य भावनापदेनाक्य
तया कर्माख्यातस्थले कर्मत्वस्याख्यातार्थकतया साक्षाद्भावनाविशेष्य एव संख्यान्वयनियमोऽस्तु। अलं परंपरया
वेत्यस्य निवेशेनेति वाच्यं। प्राचीनमते कर्माख्यातस्थलेऽपि कृत्यर्थकतया कर्मत्वार्थत्वेऽपि कर्मभावेन कर्मत्वस्य भावना
त्वविरहात्तदुपदर्शितानुपपत्तेरभावादिति। ननु यथा चैत्रेण पच्यते तंडुलः इत्यत्र नैयायिकमते परंपरया कर्मलिङ्कृ
तेरन्वयः। तथा चैत्रेण पचति तंडुल इत्यत्रापि कथं नान्वयबोधः। एवं नैयायिकमते चैत्रः पच्यते तंडुलमित्यत्रापि आश्रयता
संबंधेन कृतेरन्वयबोधापत्तिः। एवं मैत्रेण पच्यते इत्यत्र च कथं न मते कर्तृकर्मणोर्यथोक्तरीत्या कृतेर्नान्वयः। इदमु

तस्यत्ले पुसर्वरख्यातपदानूक्तेरूपस्थितिसत्वादित्याशंकामपाकर्तुमाह। तवेति वैयाकरणस्येत्यर्थः। तथान्वयबोधक
त्वमिति। कर्तृकर्मणोः कृते बोधकत्वमित्यर्थः। तथाच वैयाकरणमते तादृशतादृशशाब्दबुद्धित्वावच्छेदं प्रतितादृशाऽ
नुपूर्वीज्ञानत्वेन हेतुत्वकल्पनान्यानुपपत्तिरिति भावः। तथाविधकार्यकारणभावकल्पनादित्यर्थः। नप्रयोगाद्
त्ति। तादृशसार्थतादृशशाब्दबोधजनकादित्यर्थः। ननुभावनायाः कृतिरूपत्वेन तद्विशेष्यसंख्यान्वयः। भावनाविरोध्य
त्वाभावादित्यत आह। भावनावेति। संख्यापदेति रिक्ताख्यातार्थमात्रमेव कर्तृनियमघटकभूतभावनापदार्थ इत्यर्थः।
अचेतनानुरोधादिति रथो गच्छतीत्यादौ रथादेः संख्यान्वयानुरोधादित्यर्थः। तथाचाख्यातस्य कर्त्रादिगतसंख्या
भिधानानभिधानाभ्यामेव प्रथमान्तनीयोपपत्तौ आख्यातस्य कर्त्रादिशक्तिरनुपपन्नेति वैयाकरणानां मतमनाद
रणीयमेव। लघुकृतिशक्तिवादिनैयायिकमते अप्रद्धाने सुधीभिरिति भावः। ननु नैयायिकमते आख्यातपदद्वैत्र मालं
पदयोर्विभक्ति-नरूपैलएकधर्मिबोधकत्वरूपसामानाधिकरण्यानुभवोऽनुपपन्नः। तथाचानुभवकृतविभक्तौ---
कथं तन्मते तुमतमित्यत आह। विभिन्नार्थानित्यादि। तथाच तादृशानुभवा एव संसिद्ध इति भावः। अन्यादृशोक्ति
ति। एकधर्मवृत्ति विभिन्नधर्मबोधकत्वरूपं सामानाधिकरण्यमित्यर्थः। अत्र वैयाकरणमतानुयायिनः।
आख्यातस्य कर्त्रादिशक्तिकल्पने नैयायिकमतमपेक्ष्य लाघवसंभवात्तन्ये वोचितं। तत्र्याहीतन्मते कर्तृप्रकार
कज्ञानाभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति आख्यातपदनिरूपितशक्तिज्ञानादिघटितशाब्दबोधसामग्र्याः
प्रतिबंधकत्वाकल्पनेपि तथाविधशाब्दबोधसामग्रीकाले कर्तृप्रकारकाज्ञानाभावासत्वेन विषयासत्वेव रूद्य
ये

तथाविधलौकिकप्रत्यक्षानुत्पादसंभवे तथाविधप्रतिबंध्यप्रतिबंधकाभावकल्पनाभावप्रसंगे लोव मतिस्फुटमेवा। यो नैयायिक
मते तु तथाविधस्वाद्बोधसामग्रीकाले नादृष्टाभावनौरूपविषयत्वेन विना तथाविधप्रतिबध्यप्रतिबंधकाभावकल्पनं
तथाविधप्रत्यक्षवारणमशक्यमिति न कल्पने महद्गौरवमिति न च वैयाकरणमते कृतिप्रकारकज्ञानाभावप्रयुक्तप्रत्य
तथाविधस्वाद्बोधसामग्र्याः प्रतिबंधकत्वकल्पनावश्यकत्वे किं नैयायिकमतमपेक्ष्य लाघवावकाशः नैयायिकमते त
थाविधकल्पनायाः अभावादिति वाच्यं। वैयाकरणमते कर्तुरूपाख्यातिकाले कृतिप्रकारकज्ञानसत्त्वस्यावश्यकतया त
थाविधस्वाद्बोधसामग्रीकाले विषयासत्त्वेऽपि कृतिप्रकारकज्ञानाभावप्रसक्त्यवारणसंभवेन तथाविधप्रतिबध्यप्र
तिबंधकाभावाकल्पनात् यावदवस्थितलाघवस्य स्फुटत्वात्। यदि च नवीनोक्तं खलरीसाकल्पेन निर्वाहे तत्र तथाविधप्रति
बंधकाभावे हेतुत्वं नावश्यकमिति मन्यते तथापि तादृशप्रतिबंधकाभावे प्रसक्ते हेतुत्वसंबंधकल्पनागौरवं नैयायिकाना
मित्याहुः। तदपि न विचारसहं। गुरुशरीरपाकानुकूलकृत्याश्रयपयोगानवच्छिन्नतथाविधकृत्याश्रयभेदज्ञानाभावास
कबाधाभावत्वादिरूपगुरुधर्मावच्छिन्नादिघटितशाब्दबोधसामग्र्यभावेऽनंततद्घटवटादिप्रसक्तकार्यतावकल्पने
वैयाकरणमते एव गौरवसंभवादित्यास्तां विस्तरः। कथमिति। केन संबंधेन भावनायाः विशिष्टत्यर्थः। संसर्गविधया वि
षयस्यापरेति। सिद्धांती शंकते। विषयतयेति। अन्वयश्चास्य कथं पदार्थैकदेशे भावनायाः विशेष्यत्वं। तथा च चैत्रेण पच्यते
तंडुल इत्यादौ तंडुलाविषयतासंबंधेन भावनायाः विशेष्य इत्यर्थः। स विषयव्यापारोऽतः सविषयव्यापारत्वानभिधान
स्थल इत्यर्थः। रथेन गम्यते ग्राम इत्यादौ नोदनाख्यसंयोगरूपव्यापारस्याख्यातार्थतया तस्य च निर्विषयतया वि
षयतासंबंधेन ग्रामादौ अन्वयासंभवेनोपदर्शितरीतेरसंभवात्। किं कर्तेति भावः। मैत्रनिष्ठपाकभावनेति।

राम
३६

मैत्र निष्ठा या वा कानुकूलाभावनात द्विषयत्वं तंदुलइत्यर्थः। तंदुलेन तथाविधभावनाविषयत्वं तूपादानत्वाख्यं गा समि सवधे
यं। कर्माख्यात स्थले कर्मत्वप्रकारक कर्म विशेष्यक बोधस्यानुभवसिद्धत्वे साह। मैत्र निष्ठेति। ज्ञतीयत इति। तादृश
वाक्यजन्यशाब्दबोध इति शेषः। साक्षात्परंपरया वेति। अत्र च उपदर्शित बोधद्वयो विकल्पानुरोधेन तथा वे कल्पिकोपा
दानमिति ध्येयं। रथेन गम्यते ग्राम इत्यादौ ग्रामे भावनायाः अन्वयप्रकारमाह। रथेन गम्यत इत्यादिना। तथा च कर्मा
ख्यात स्थले भावनायाः धात्वर्थेन्वयः केचि द्विषयतया कुत्रचिज्जन्यतया कर्मत्वमित्युपरं परयेति भावः। प्राचीनमतं दू
षयितुं नवीनमतं दर्शयति। नव्या स्त्विति। ननु कर्माख्यात स्थले आधेयत्वस्य तृतीयार्थत्वेन कर्त्राख्यात स्थले य
त्र भावना विशेष्यत्वेनान्वेति कर्माख्यात स्थले स एव भावना विशेष्यत्वेनान्वेति स्यानुभवविलोपापत्तिः। एवं तादृश
वाक्यने तथाविध बोधजननेआधेयत्वे तृतीयापदशक्तिज्ञानस्य सहकारित्व कल्पने गौरवं चेत्यत आह। संख्या
मात्रं वेति। मात्रपदेनाधेयत्वव्यवच्छेदः। संबंधः। चैत्रभावनयोः संबंधइत्यर्थः। वाक्यार्थ इति। तथाविधवाक्य
क्यानुपूर्वी बलात्सामर्थ्य बोधे भासत इत्यर्थः। तथा च तथाविधश्रे इत्यनुभवे स्तृतीया संख्यामात्रे तृतीयार्थः। अथे
य त्वं तु संबंधमर्यादया भासत इति भावः। तथेति। वाक्यार्थ इत्यर्थः। तदपीति। फलमपीत्यर्थः। तथेति। वाक्या
र्थ संबंध इत्यर्थः। भासमानत्वादिति। तथा च नामार्थधात्वर्थयोः भेदान्वयबोधानभ्युपगमेन कर्माख्यातस्थ
ले फलप्रकारक बोधानुभवापलापेन न तत्र फलस्य संबंधविधया भानासंभवादि भावः। क्रियाजन्य फला
श्रयत्वादिति। जन्यता संबंधेन क्रियाविशिष्टं यत्फलं तस्य धातुना लाभादित्यर्थः। एतावता प्राचीनमतं दूषयि
त्वा नवीनः स्वमतमुपसंहरति। तस्मादिति। इत्थं चेति। फलस्यासमानपदार्थत्वेनेत्यर्थः। न लभ्यत इति। तथा च कर्मा

ख्यातस्थले फलविशेष्यकजन्यतासंसर्गकक्रियाविशेषणकबोधोनुभवसिद्धः स चानुपपन्न इति भावः। भावनाविशे
षस्य चेति। भावनाया विशेषस्य चेत्यर्थः। फले ऽन्वये जन्यतासंबंधेन फले ऽन्वये ऽन्यत्र कृप्त इति। कर्त्राख्यातस्थले कॢ
प्त इत्यर्थः। तथा च तत्राख्यातार्थान्तरे वर्तमानत्वे धात्वर्थस्यान्वयावगतिः कारणं यथा धात्वर्थनिष्ठप्रकारतानिरूपकविशेष्य
तासंबंधेन शाब्दबुद्धिं प्रति सावच्छिन्नं प्रति आख्यातपदजन्यकृत्युपस्थितेर्विशेष्यतासंबंधेन हेतुत्वस्य कल्पनात् धात्वर्थवि
शेषणत्वेन तिङर्थकृतेरन्वय इति भावः। कृत्यनभिधायके ति। कृत्यनभिधायको यो भावकर्मविहितलकारस्तद्योगेन
भावनाकृत्युपस्थापकैस्तृतीयान्तपदैरित्यर्थः। युष्मत्पादादिति। चैत्रेण गम्यत इत्यादिभावादिविहितलकारस्य स्थले कृत्या
इत्यर्थः। तथा विषये कृत्यस्य स्थले सुबर्थकृतिनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दं प्रति धातुपदजन्योपस्थि
तेर्विशेष्यतासंबंधेन हेतुत्वस्य कॢप्तत्वात् सुबर्थकृतिप्रकारकक्रियाविशेष्यकबोधे बाधकाभाव इति भावः। नन्वाख्या
तस्य कृतिकर्मत्वाभिधायकत्वे चैत्रेण पच्यते तंडुलस्तंडुलं पचति चैत्र इत्यादिप्रयोगापत्तिरत आह। कर्तृकर्मवदिति।
वैयाकरणमते यथा कर्त्राख्याते कर्तृत्वं शक्ततावच्छेदकं कर्माख्याते कर्मत्वं शक्ततावच्छेदकं। तथा नैयायिकमतेपि कर्त्रा
ख्याते कृतित्वं शक्ततावच्छेदकं। एवं कर्माख्याते कर्मत्वं शक्ततावच्छेदकमिति नियमप्रदर्शितस्थले कृतिकर्मत्वयोर्बोधाभावा
न्नोक्तदर्शितप्रयोगापत्तिरिति भावः। ननु कृतिकर्मत्वयोः शक्ततावच्छेदकत्वे कर्त्राख्याते कर्माख्याते तत्रेऽप्यतेद्दस्तत्र
उभयं भवितमाह। नवेति। तथा सति पचते तंडुलो मैत्र इत्यादिप्रयोगापत्तिर्दुर्वारैवेति भावः। केचित्तु आख्यातत्व
मेव कृतिशक्ततावच्छेदकं। लाघवात्। न चैवमुक्तप्रयोगापत्तिः। कृतिविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन

तंडुलं

कृतिसाध्यबोधेजननीये चैत्रः पचतीत्याद्यानुपूर्वीज्ञानस्य सहकारिकल्पनात्। एवं कर्मत्वविशेष्यप्रकाराख्यातपदनिरूपितशक्तिज्ञानेन कर्मत्व
बोधजननीये चैत्रेण पच्यते तंडुलः इत्याद्यानुपूर्वीज्ञानस्य सहकारिकल्पनाद्योपदर्शितान्वयव्यतिरेकाभावादिति। एवमन्यत्राप्यापत्तिः शंकापकाख्या
नुपूर्वीज्ञानसहकारित्वस्वरूपसलिलधाराधोरणीभिरपनीयेति प्राहुः। ननु कर्माख्यातस्य चेत् तन्न रूपपरनामकभावनार्थत्वं हि किं तोभा
वनान्वयिनि संख्यान्वयनियमः चैत्रेण पच्यते तंडुल इत्यादौ भावनान्वयिनि तंडुलसंख्यान्वयेन व्यभिचारादित्यत आह। तिङ्‌सुपेत्स्था
पिताया इति। तथा च संख्यायाः प्रथमान्तोपस्थाप्ये एवान्वयनियमो न तु भावनान्वयिनि तस्यां अन्वयनियम इति भावः। ननु आख्या
तोपस्थाप्यान्वयिन्येव संख्याया अन्वयनियमः किं नाभ्युपेतरूपात्तत्सपि कर्माख्यातस्थलेऽनुपपद्यमानं भाव इति चेन्न। तथा
नियमांगीकारेण पचतीत्यादौ वर्तमानत्वादिविशिष्टेपि संख्यान्वयप्रसंगादिति। कर्तृकर्मविहिताख्यातशक्तिमुपपादयकर्तृकर्म
विहितत्वस्य शक्तिमुपपादयति। चैत्रो गत इत्यादि। अपसार्यतामित्यंतस्य कर्तृकर्मणिक्तस्यैत्यनेनान्वयः। कर्त्रादिविहितत्व
तकर्त्राद्यवाचकत्वे चैत्रो गत इत्यादौ समानलिंगकत्वानुपपत्तेः। समानलिंगकस्थलेऽभेदान्वयबोधस्यानुभवसिद्धतया तस्यानिर्वाह आ
इति भावः। ननु ताहृशानुभवे मानाभाव इत्यत आह। भोक्ता त्वपतीत्यादि। अत्र कृत्स्नस्य कर्त्राद्यवाचकत्वे भोजनानुकूलकृति
स्त्वपतीत्याद्यन्वयबोधः स्यात्। स च विशेषदर्शिनामनुपपन्न इति विशेषदर्शिनां ताहृशबाधात् भोजनानुकूलकृतिमान्स्त्वप
तीत्याद्यन्वयबोधोपपत्त्यर्थं कर्त्रादिविहितकृतः कर्त्रादिवाचकत्वमावश्यकमिति भावः। सामानाधिकरण्यादीति। अभेदान्वय
बोधादीत्यर्थः। आदिना भोक्ता त्वपतीत्यादौ भोजनानुकूलकृतिमान्स्त्वपतीत्याद्यन्वयबोधपरिग्रहः। ननु कृत्स्नस्य कर्त्रादि
वाचकत्वे गत इत्यादौ धात्वर्थेऽन्वयानुपपत्तिः। कर्त्रादेः कृतसाश्रयादिरूपतया कृतादेः पदार्थैकदेशत्वेन तत्रानुकृत्यादिसंबंधेन कृष्ण
धात्वर्थगमनान्वयासंभवादित्यत आह। चैत्रस्य नप्तेत्यादि। नप्तृपदस्य जन्यपुरुषजन्यपुरुषरूपपुत्रपुत्रवाचकतयाजन्य १७

त्वस्य पदार्थैकदेशत्वेपि तत्रैव चैत्रस्य निरूपकतार्थस्य चैत्रसंबंधित्वस्यान्वयः जन्यपुरुषजन्यपुरुषत्वरूपनप्तृपदार्थे चैत्रसंबंधित्वस्या
न्वये चैत्रपुत्रेपि चैत्रस्य नप्तेति प्रयोगप्रसंगात्। तथा च तत्र यथा पदार्थैकदेशेऽन्वयस्तथा चैत्रो गंतेत्यादौ पदार्थैकदेशेऽन्वयबो
धांगीकारेपि क्षतिविरह इति भावः। ननु जन्यपुरुषजन्यपुरुषत्वस्य नप्तृपदशक्यतावच्छेदकत्वे विशिष्टशक्तिकल्पने गौरवापत्त्या
तदपहाय जन्यत्वं पुरुषत्वं चेति शक्यतावच्छेदकद्वयमेव तस्य सकूम्य। तथा च चैत्रस्य नप्तेत्यादौ चैत्रसंबंधित्वस्य जन्यत्वेऽन्वयः।
जन्यत्वस्य च पुरुषेऽन्वयः। पुरुषस्य जन्यतासंबंधेनान्वयः जन्यत्वस्य पुनः पुरुषेऽन्वयः इत्येवंरीत्या चैत्रसंबंधिजन्याभिन्नपुरुषज
न्याभिन्नपुरुष इत्यन्वयबोधस्य विनैकदेशान्वयमुपपत्तेः उपदर्शितदृष्टांतासंभवदुक्तिक इति स्थलांतरे तमाह। मैत्रादन्य
इत्यादि। अयं भावः। अन्यपदस्य भेदस्य वा शक्यतावच्छेदकत्वं न तु भेदाश्रयत्वं तथा गौरवात् तथान्वयबोधानुभवाच्च। एतेनान्यपद
स्यापि खंडशक्तिकल्पनं निरस्तं। तथा च मैत्रादन्य इत्यादौ पंचम्यर्थप्रतियोगित्वस्यान्वयपदार्थैकदेशभेदान्वयो विनैकदेशान्व
यस्वीकारं अनुपपन्नः। एवं घटात्पृथगित्यादौ पंचम्यर्थस्य पदार्थैकदेशे पृथक्त्वे पंचम्यर्थावधिमत्त्वस्यान्वयोपि तथा। तथैव घटा
दन्य इत्यादौ नञो विरोधिगुणाद्यनिलक्षणया पदार्थैकदेशे विरोधिगुणे पंचम्यर्थान्वये न घटावधिकपरत्वविरोधिगुणवानित्य
न्वयबोधोपि। तथा चैतेषु दृष्टांतसमयस्थलेष्वेकदेशान्वयस्वीकारे बाधकाभाव इति। ननु गौर्नित्यापरत्वरूपत्वमित्यादौ गोत्वपरत्व
त्वादेर्नित्यत्वपर्यभिन्नत्वयोरन्वयबाधापत्त्या किंचित् किंचित्पदार्थानिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रति
मुख्यविशेष्यतासंबंधेन पदजन्यपदार्थोपस्थितेर्हेतुत्वस्यावश्यकतया चैत्रस्य नप्तेत्यादौ पदार्थैकदेशे जन्यत्वे कथं चैत्रसंबं
धित्वस्यान्वय इत्याशंकायामाह। तथैवेति। कार्यतावच्छेदकसंबंधविशेष्यतायां नप्तृपदार्थातिरिक्तवृत्तित्वनिवेशेन सर्थः। साकां
क्षत्वादिति। शाब्दबोधपदार्थोपस्थित्योः कार्यकारणभावस्य कल्पनीयत्वादिति सर्थः। तथा चान्यथानुपपत्त्या गुरुतरपि तत्त्वेव का

18

यं कारणाभावः स्वीक्रियते इति भावः। ननु चैत्रस्य न गमनमित्यादौ अन्यताश्रयपुरुषजन्यत्वरूपसंबंधस्यैव षष्ठ्यर्थः। तस्यैव नञ्पदार्थाभावे जन्यपुरुषजन्य
पुरुषेऽन्वयः। ननु पदार्थैकदेशेऽनन्वयत्वे चैत्रनिरूपितत्वरूपषष्ठ्यर्थस्य संबंधाऽन्वयः। तथा सत्यपदर्शितकार्यकारणभावेन नञ्पदार्थाघटितकृ
तिनिरूपणविशेष्यतामाः। निवेशगौरवात्। तथा नोक्तदृष्टान्तानामवकाश इत्यत आह। अक्तवेति। कृत्यादिघटितत्वे इति। स्वानुकूलकृति
मत्त्वादिरूपपरंपरासंबंध एवेत्यर्थः। कर्त्रादिना समन्वयइति। कृत्प्रत्ययार्थकर्त्रादौ धात्वर्थगमनादिप्रकारकबोधे प्रकारतावच्छेद
कसंबंधइत्यर्थः। तथा च यथा नञ्पदार्थे उपदर्शितपरंपरासंबंधरूपषष्ठ्यर्थस्यैवान्वयः स्वीक्रियते यथा वा चैत्रादन्यइत्यादौ
स्वाश्रयभेदवत्त्वसंबंधेन भेदविशिष्टचैत्रप्रतियोगिकत्वस्यान्वयः। ननु एकदेशान्वयोपि तथा गन्तेत्यादावपि कर्त्रादिरूपकृत्प्र
त्ययार्थ एव स्वानुकूलकृतिमत्त्वादिरूपपरंपरासंबंधेन गमनादेरन्वयो न तु पदार्थैकदेशे इति भावः। ननु चैत्रेण गतो ग्राम इत्यादौ क
र्मप्रत्ययेन कर्मादिगतसंख्याभिधानात् द्वितीयाद्यापत्तिरत आह। मुख्येत्यादि। फलादीत्यादिपदेन विषयत्वादिपरिग्रहः। क्त्यादित्यादि
पदेन चैत्रस्य गच्छतीत्यादावाश्रयत्वादिपरिग्रहः। द्वितीयादयइत्यादिना तृतीयापरिग्रहः। अत्र चेति। चैत्रेण गतो ग्राम इत्यादौ चेत्यर्थः। वि
शेष्याभिधानइति। कर्मादिविशिष्टस्य बोधन इत्यर्थः। विशेषणस्याप्यभिधानादिति। कर्मत्वादेरपि बोधनादित्यर्थः। तथा च क्तप्रत्यये
न यत्र विशेष्यविधया विशेषणविधया वा कर्मत्वादिकं न बोध्यते तत्र द्वितीयादयः इत्येको नियमः। एवमाख्यातेन यत्र कर्मत्वादि
कं बोध्यते तत्रापि द्वितीयाइत्यपरोपि नियमः स्वीक्रियते। ननु कर्मत्वादिगतसंख्याभिधानघटितोपि नियम इति नोक्तानुपप
त्तिरिति भावः। कस्यचिन्मतं दूषयितुं तन्मतमनुवदति। यत्त्वित्यादिना। धातूत्तरप्रत्ययत्वेन कृतौ शक्तिरिति। धातूत्तरप्रत्ययत्व
मेव शक्ततावच्छेदकमित्यर्थः। तथा च शक्ततावच्छेदकलाघवात् सर्वत्र कृतावेव शक्तिः। नन्वाख्यातस्य कृतौ शक्तिः। कृत्प्रत्य
यस्य च कर्तरि शक्तिरिति। तथा सति विभिन्नशक्ततावच्छेदकादिकल्पने गौरवादिति भावः। ननु कृत्सु स्वप्रत्ययस्य कृतिरा

कस्येदेवदत्तः पाचकइत्यादौ देवदत्तादिपदार्थे पाचकाद्यर्थस्य कथमभेदान्वयबोधः । तत्राभेदान्वयबोधस्यैवाऽनुभवसिद्धतया प्रकारां
तरस्य च कुमराक्य त्वादिसत आह । पाचकादिपदेत्विस्यादि । सामानाधिकरण्यानुरोधात् । अभेदान्वयबोधानुरोधात् । लक्षणेति ।
यथा च तत्र तथान्वयानुभवस्य कृतेः कर्त्रि लक्षणयैव निर्वाहे लं तत्र शक्तिकल्पनयेति भावः । भावकृतोपीति । शक्ततावच्छेदकावच्छि
न्नस्य शाब्दबोधकत्वनियमादिति भावः । ननु धातूत्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वे विभावकृतो न कृतिबोधकत्वं । तथावि
धबोधे भावकृतादिवारणाय नानुपूर्वीविशि ष्टस्यैवाऽनेयामकत्वाभ्युपगमादित्यत आह । धातुत्वादिघटितेत्यादि । आदिपदात्प्रत्ययत्वादि
परिग्रहः । तस्मात् । धातूत्तरप्रत्ययत्वात्मकवाधघटितमत्वं विना त्वस्याप्रकारांतरेणानिर्वक्तुमशक्यत्वात् । एवमाख्याताद्यन्य
तमत्वं विनाप्रत्ययत्वस्यापीति तदपेक्षया लघुदिसंबंधेनाख्यात तपःस्थानु दवत्त्वरूपाख्यातत्वस्यैव लघोः कृतिशक्ततावच्छेदकत्वोचितमि
त्यतिभावः । एतेनाख्यातमात्रस्य कृतिवाचकत्वे कृतिशक्ततावच्छेदकमाख्यातत्वं एवं च ततः कर्तृमात्रवाचकत्वे कृत्प्रत्ययत्वं कर्तृशक्तताव
च्छेदकं इति गौरव --- तदपेक्षया एकस्यैव धातूत्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वमुचितमित्यपि परास्तं । प्रत्ययत्वस्याख्यातत्वघटि
तत्वेन लाघवानवकाशादिति । कृतौ शक्तिरिति । कृतिविशिष्टे कर्तरि कृतः शक्तिकल्पनेऽनन्तकृतौ तच्छक्यतावच्छेदकत्वकल्पने गौ
रवेण कृतौ तत्कल्पने तु कृतित्वमात्रस्य तच्छक्यतावच्छेदकत्वकल्पने लाघवमिति तत्रैव तत्कल्पनमुचितमिति भावः । पचतीत्यादौ श
क्यत्वासंभवादिति । तस्य गवादिपदानां गोत्वविशिष्टे शक्यमित्यनेनान्वयः । ननु गवादिपदस्य गोत्वविशिष्टे शक्तिकल्पने गोत्वे विशक्ति
कल्पनस्यावश्यकतया लाघवात्तत्रैव तत्कल्पनमस्त्वित्यत आह । गोत्वादिनेत्यादि । गोत्वस्य गवेतरासमवेतत्वे सति गोनिष्ठाऽन्योऽ
न्याभावप्रतियोगितावच्छेदकत्वरूपतया गौरवादिति भावः । विशिष्टेतराणामिति । शब्दविशिष्टमहत्त्वविशिष्टादीनामित्यर्थः ।
शब्दशक्यमिति । आकाशपदे महत्त्वादिशक्यत्वमित्यर्थः । तत्रापि शब्दादिविशिष्टे शक्तिकल्पनेऽनन्तशब्दादौ शक्यतावच्छेदकत्व
स्वीकारे गौरवं शब्दादेस्तच्छक्यत्वकल्पने शब्दत्वादिजातेः शक्यतावच्छेदकत्वस्वीकारे लाघवमिति तत्रापि शब्दादावेव शक्तिकल्प

राम
१६
15

नेस्यादितिभावः। तुल्य एवेति। एतत्सत्त्वयस्य लेपि अविशिष्ट इत्यर्थः। तथा च यथा शब्दादौ आकाशादिपदस्य स्वारसिकप्रयोगाभावात्तत्र न तस्य
शक्यत्वं। तथा एतावविकर्त्ते विहितत्वस्य स्वारसिकप्रयोगाभावात्तत्रापि न तस्य शक्यत्वमिति भावः। कस्यचिन्मतं दूषयितुमन
दृशयति। एवमिति। आरभ्य केचिदित्यंतेन। एवं कर्मविहितत्वकर्मविहिताख्यातयोः फलबोधकत्वव्यवस्थापने चेत्यर्थः। अन्य
लभ्य इति। एतेन शब्दार्थ इति। नियमस्यापि न भंग इति सूचितं। व्यापारविशेषमात्रमिति। गमनत्वादिविशिष्टमात्रमित्यर्थः। मा
त्रपदेन फलव्यवच्छेदः इति स्थितावितीति व्यवस्थितावित्यर्थः। ननु व्यापारमात्रस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ फलल
भ्रता कर्मत्वस्य कुतो लाभ इत्यत आह। ग्रामं गच्छतीत्यादि। आख्यातत्वृद्धेदेन उदाहरणद्वयं। द्वितीयादेरिति। अत्रादिना ग्रा
मस्य गमनेत्यादौ प्रथमापरिग्रहः। फलजनकत्वलक्षणमिति। फलत्वमत्र जन्यत्वं द्रष्टव्यं। फलत्वविशिष्टजनकत्वं स्वं द्वितीयाद्यर्थ
वे ग्रामं गच्छतीत्यादौ परसमवेतधात्वर्थजन्यफलशालित्वलक्षणकर्मत्वस्य बोधप्रकारमाह। फले चेत्यादि। चैत्रस्पंदनमित्यादिवद
कदेशान्वयस्वीकारेण तथान्वयबोधस्वीकारे तुल्यवित्तिवेद्यतया उपदर्शितकर्मत्वस्यापि बोध इत्यभितिवः। फलजनकत्वे द्वि
तीयादेः शक्तिकल्पने गौरवात्तदपहाय फले शक्तिः। जनकत्वं तु संसर्गमर्यादया भासते इत्यस्यैव सम्यक्त्वात्तदभूवाह। फल
मां वेति। जन्यत्वविशिष्टं वेत्यर्थः। फलसामान्यलाभपीति। जन्यत्वविशिष्टलाभेपीत्यर्थः। नियतेति। लक्षणोपस्थितिशक्तिभ्रमा
कालीनेत्यर्थः। संयोगविभागाद्यलाभादिति। संयोगत्वविभागत्वादिना संयोगविभागादिरूपफलस्यालाभादित्यर्थः। तस्मादिति।
र्वमते उपदर्शितदोषसंभवादित्यर्थः। फलविशेषावच्छिन्नेति। संयोगादिविशिष्टजनकेत्यर्थः। ननु लक्षणोपस्थित्याद्यभावकाले
तथाविधबाधाभावेक्षणविरह इत्यतो दोषांतरमाह। अन्यथेति। व्यापारमात्रस्य धातुवाच्यत्वे इत्यर्थः। पर्यायतापत्तेरिति। एकश
क्यतावच्छेदकावच्छिन्ने नानापदस्यैव पर्यायपदार्थत्वादिति भावः। शंकते नन्वपीति। संयोगत्वादिविशिष्टावच्छिन्नव्यापारस्य धातुशक्य रुद्र
१६

त्वादिनो नोपीत्यर्थः। संयोगत्वावच्छिन्नभिन्नत्वादिजन्यत्वरूपफलत्वावच्छिन्नस्यैव कर्मीत्वात् तावाच्यत्वेन फलांतरस्यापि बोधसंभवादिति
भावः। तदवच्छिन्नेति। संयोगत्वविशिष्टावच्छिन्नेत्यर्थः। तथा च तादृशसमभिव्याहारविशेषस्यैव तथाविधकार्यतावच्छेदकत्वादिति भा
वः। समभिव्याहारविशेषात् सामान्यधर्मावच्छिन्नबोधकपदस्य विशेषबोधकत्वे दृष्टांतमाह। यथेत्यादि। अन्यदेतदिति। तथा च यदिह
इष्टत्वरूपेण स्वर्गबोधकत्वं तथा ममापि प्रकृते फलत्वरूपेण संयोगादिबोधकत्वं। यद्यपि तद्दृष्टस्वर्गमोक्षभेदान्वये स्वर्गादिरूपफलबो
धकत्वं तदा तु प्रकृते संयोगादिफलयोरभेदान्वयेन संयोगादिबोधकत्वमिति भावः। ननु सामान्यधर्मावच्छिन्नबोधकपदात् सामान्यरूपेण
विशेषबोधसंभवेपि गम्यते ग्राम इत्यादौ संयोगत्वादिना संयोगस्य ग्रामवर्तित्वबोधालाभप्रसंगः। न च संयोगफलयोरभेदान्वयेन संयोगत्वरूपेण
तथा बोधसंभवदिति वाच्यं। इतरविशेषणलाभेनोपस्थितस्यान्यत्रान्वये निराकांक्षत्वेन तथान्वयासंभवादित्यत आह। अस्त्वेति। तथा च यथा बु
द्धिविशेषविषयत्वरूपसामान्यधर्मावच्छिन्ने शक्तं तदादिपदं घटकत्वादिरूपविशेषरूपेण बोधकं। तथा प्रकृतेपि फलत्वरूपसामान्यधर्मावच्छि
न्नशक्तमाख्यातपदं संयोगत्वादिरूपविशेषरूपेण बोधकं। यद्धर्मावच्छिन्ने पदनिरूपितशक्तिग्रहः तेन रूपेण बोधजनकत्वमिति नियम
स्येतदतिरिक्तस्थलीयत्वादिति भावः। इदं च तदादिसर्वनामपदस्य शक्यतावच्छेदकं बुद्धिविशेषविषयत्वमेव शक्तिग्रहोपि तद्धर्मावच्छि
न्न एव। बोधस्तु घटोस्य बुद्धिस्थ इत्यादिज्ञानसहकृतात् ज्ञातित्वेन घटत्वादिप्रकारकपदनिरूपितशक्तिग्रहात्। स्वरूपतो घटत्वादि
प्रकारकबोधापत्तिवारणार्थं निरवच्छिन्नप्रकारतासंबंधेन शाब्दबुद्धिं प्रति निरवच्छिन्नप्रकारतासंबंधेन पदनिरूपितशक्तिज्ञानहेतुत्व
कल्पनस्यावश्यकतया कथं फलत्वविशिष्टे आख्यातादिपदनिरूपितशक्तिज्ञानात् संयोगत्वादिना शाब्दधीः बोधो। तदा संयोगत्वे उपदर्शि
तसंबंधेन उपदर्शितकारणविरहात्। न च विषयभेदेन तादृशकार्यकारणभावकल्पने गौरवात्। न च तदादिपदाद्विशिष्य शाब्दबोधा
न्यथानुपपत्त्या तथा कल्पनमावश्यकमिति वाच्यं। अनंतकार्यकारणभावकल्पनापेक्षया तदादिपदानां विशिष्य शक्तिकल्पनस्यैव
औचित्यादिति प्रकृतेपि विशिष्य [illegible] कर्मत्वं निर्वचनमुखेन व्यापारमात्रस्य

धात्वर्थत्वे दूषणमाह। अपि चेति। धात्वर्थतावच्छेदकफलेति। धात्वर्थतावच्छेदकत्वविशिष्टफलेत्यर्थः। गमिपत्योः कर्मत्वस्येत्यादि।
अत्र च धात्वर्थगमनादिक्रियाजन्यविभागरूपस्य फलस्य पूर्वदेशो विषयत्वात् गमिपत्योः पूर्वदेशस्यापि कर्मत्वापत्तिरेवं सति क्रिय
जन्यसंयोगरूपफलस्य उत्तरदेशे सत्वात् उत्तरदेशस्यापि त्यजेः कर्मत्वापत्तिः। तथा स्पंदजन्यविभागादिफलस्य पूर्वापरदेशयोः स
त्वात् स्पंदेरुभयत्र कर्मत्वापत्तेरतो न धात्वर्थजन्यफलशालित्वं कर्मत्वं। किं तु धात्वर्थतावच्छेदकफलशालित्वं तत्। तत्र च नोपदर्शितानु
पपत्तिः। उत्तरसंयोगरूपफलस्य गमधात्वर्थतावच्छेदकतया तस्य च पूर्वदेशेऽभावात्। एवमधःसंयोगस्य पतेरवच्छेदकत्वात् तस्य पूर्वदेशेऽ च
भावात् न गमिपत्योः पूर्वदेशे कर्मत्वापत्तिः। एवं विभागस्य त्यजिक्रियावच्छेदकतया तस्योत्तरदेशेऽभावात् नोत्तरदेशे त्यजेः कर्मत्वापत्तिः। स्पंदेश्चा
वच्छेदकफलं कर्मत्वे च न नोभयत्र कर्मत्वापत्तिरिति व्यापारमात्रस्य धात्वर्थत्वे आगमं गच्छतीत्यादौ कर्मत्वबोधानुपपत्तिरेव दोष इति भावार्थोऽ
वसेयः। ननु तत्तद्धात्वर्थजन्यतत्तत्फलशालित्वमित्यननुगमकर्मत्वमस्तु। अनुगतकर्मत्वनिर्वचने प्रयोजनाभावात् अतोऽनुगतकर्मत्वनि
र्वचनप्रयोजनमाह। फलावच्छिन्नेति। फलजनकेत्यर्थः। सकर्मकत्वव्यवहार इति। तथा चाऽनुगतकर्मत्वानिर्वचनेऽनुगतकर्मत्वव्यवहाराव
लोपप्रसंग इति भावः। नन्वेवं सति कथं जानातीत्यादौ कर्मत्वव्यवहार इत्यत आह। भाक्तस्येति। लाक्षणिक इत्यर्थः। तथा चोपदर्शितसकर्म
कत्वं मुख्यसकर्मकत्वव्यवहारनियामकं। विषयत्वादिकं तु भाक्तसकर्मकत्वव्यवहारनियामकमिष्यतां न चेद्दोष इति भावः। ननु अनुगतमेवक
र्मत्वमस्तु अनुगतव्यवहाराभावे इष्टापत्तिरत आह। नादृशधातुयोग एव चेति। उपदर्शितधातुयोग एव चेत्यर्थः। तथा चानुगतकर्मत्वानिर्वच
नेऽसकर्मकधातुयोगे कर्मप्रत्ययविधानस्याननुगतत्वापत्तेरिति भावः। अत्रेदमवधेयं। यद्यपि धातुत्वस्य तदर्थकतावच्छेदकत्वस्य चैक्या
भावेन धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वमपि नानुगतं। एवं नादृशसकर्मकत्वविरहेऽपि जानातीत्यादौ यथा तत्तद्धातुयोगे कर्मविधा
नं। तथाविधिशिष्यगम्यादियोगे विकर्मप्रत्ययविधानं संभवत्येव। तथा च तत्तद्धातुजन्यतत्तत्फलशालित्वरूपाऽननुगतकर्मत्वनिर्वचनेऽपि न दोषः। २०

कर्मत्वस्यापि विधानेऽननुगतत्वात्तदंतरस्य प्रकारांतरेणाप्यसंभवादिति व्यापारमात्रस्य धात्वर्थत्वेपि न दोषः। तथापि तज्जात्वर्थजन्यतत्क्रियाजन्यफलव्या
न त्वरूपाननुगतकर्मत्वमुक्त्वा व्यापारमात्रस्यैव धात्वर्थत्वे सति गम्यादिः पर्यायतापत्तिरितोषो ह दूरत एवेति। ननु फलावच्छिन्नव्यापारस्य धात्वर्थ
त्वे ग्रामं गच्छतीत्यादौ ग्रामादिरूपनामार्थस्य कुत्रान्वयः न तावत् धात्वर्थैकदेशे फले नामार्थधात्वर्थयोर्भेदेनान्वयबोधानभ्युपगमा
दत आह। तत्र चेति। ग्रामं गच्छतीत्यादौ चेत्यर्थः। तत्त्वेति। द्वितीयार्थवृत्तित्वं चेत्यर्थः। आकाशादिवैचित्र्यादिति। पदार्थः पदार्थेनान्वे
ति न तु पदार्थैकदेशेन इति व्युत्पत्तेः संकोचकल्पनादित्यर्थः। तथा तत्रैव ग्रामार्थस्यान्वयो न तु धात्वर्थैकदेशे फले इति भावः। ननु
ग्रामं गच्छतीत्यादौ धात्वर्थकर्मकारकस्याधिकरणत्वेनान्वये कर्मणि द्वितीयेति पृथक्सूत्रप्रणयनमनर्थकमेव सप्तम्यधिकरणे
चेति सूत्रद्वितीयासप्तम्या नधिकरणे चेति करणेनैव निर्वाहादित्यत आह। अत एवेति। धात्वर्थतावच्छेदकफले द्वितीयार्थवृत्तित्वस्या
धात्वर्थैकदेशे फलेऽन्वयादेवेत्यर्थः। तथा च सप्तम्यर्थवृत्तित्वस्य धातुग्राह्यमुख्यविशेष्येऽन्वयः। द्वितीयार्थवृत्तित्वस्यऽन्वय इति सूचना
र्थं तत्र पृथक्सूत्रप्रणयनमिति भावः। न चैवं सति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेः संकोचकल्पने गौरवमित्यत आ
ह। अस्तु वेति। फलमर्थ इति। तथा च फलावच्छिन्नव्यापारस्य धात्वर्थत्वेपि फलमेव द्वितीयार्थः। तदुक्तं जनकतासंबंधेन धात्वर्थेऽन्वेति
आधेयत्वं तु द्वितीयार्थः कर्मकारकयोः संबंधमर्यादया भासते तथा च ग्रामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगनिष्ठसंयोगानुकूले
गमनानुकूलाकृतिरित्येवान्वयबोध इति भावः। ननु तथापि चैत्रवाक्यजन्यबोधे संयोगस्य वारद्वयं भानमनुभवविरुद्धमत आह।
स्तां वेति। न चैवं गमिसंज्ञयोः पर्यायतापत्तिरिति वाच्यम्। यत्सदृशावयवतावच्छेदकता व्यापकतावच्छेदकत्वं यत्र तिष्ठति तत्संनद्ध
नामेव पर्यायत्वादिति भावः। ननु फलव्यापारयोर्धात्वर्थत्वेन तत्र तत्र कथं फलजनकव्यापारबोधानिर्वाहित्यत आह। विशिष्टस्येति। जन

कर्तासंबंधेन फलविशिष्टव्यापारस्तिङर्थः। अन्वयबललभ्य इति। फलव्यापारयोः परस्परमन्वयाल्लभ्य इत्यर्थः। तथाच धातुसन्निवेचित्र्यादेवपदार्थ-
योरपि परस्परमन्वयबोधस्वीकारेण तथाविधविशिष्टबोधनिर्वाह इति भावः। ननु धात्वर्थतावच्छेदकफलशालित्वरूपस्य कर्मत्वरूपत्वे भू-
मिं प्रयाति विहग इत्यादिवत् स्वात्मानं प्रयाति विहग इत्यादिप्रयोगापत्तिः। तत्र संयोगादिरूपफलस्य द्विनिष्ठतया स्वात्मनोपि तादृशफलाश्रयत्व-
संभवेन स्वात्मवृत्तितादृशफलानुकूलव्यापारानुकूलकृतिमान् विहग इत्यादिशाब्दबोधसंभवादित्यत आह। भूमिं प्रयातीत्यादि। क्रि-
यान्वयीति। एतेन परसमवेतत्वस्य द्वितीयार्थत्वेपि तस्य फलेऽन्वये संयोगादिरूपतत्फलस्य द्विष्ठतया स्वात्मवृत्तित्वेन तथाविधप्रयोगवा-
रणासंभव इति निरस्तं। ननु परसमवेतत्वमित्यत्र किमवच्छेद्यपरत्वं विवक्षितं प्रकृतधात्वर्थापेक्षयेति चेन्न। चैत्रेण स्वात्मा गम्यत इति प्रयोगापत्तेः।
तत्र प्रकृतधात्वर्थगमनापेक्षया आत्मनः परत्वादित्यत आह। इयांस्त्विति। विशेषमेवमुपपादयति। परत्वमित्यादिना। तिङादीत्यत्रादिना कर्म-
कृत्प्रत्ययग्रहः। स्वार्थेति। स्वार्थो यत्फलं तदाश्रयापेक्षयेत्यर्थः। इदंच फलावच्छिन्नव्यापारादेर्धात्वर्थत्वपक्षे। फलव्यापारयोर्धात्वर्थत्वपक्षे
तु आख्यातादेराश्रयत्वाद्यर्थकतया स्वार्थाश्रयत्वाश्रयापेक्षयेत्यर्थोऽवसेयः। तथा च ग्रामं गच्छतीत्यादौ ग्रामान्यवृत्तिर्यो ग्रामवृत्तिसं-
योगानुकूलस्पन्दस्तदनुकूला कृतिरित्येवान्वयबोधः। एवं ग्रामो गम्यत इत्यादौ ग्रामान्यवृत्तिर्यो ग्रामवृत्तिसंयोगानुकूलस्पन्द-
स्तज्जन्यफलवान् तदाश्रयतावान् वा ग्राम इत्यन्वयबोध इति भावः। ननु सर्वत्र द्वितीयासमभिव्याहृतस्थले फले धात्वर्थत्वे घटं जानाती-
त्यादिप्रयोगानुपपत्तिः। ज्ञानजन्यफलस्य घटादाववृत्तित्वेन तत्र तदंशेऽभेदेनान्वयबोधासंभवात्। एवं सर्वत्र परसमवेतत्वं कर्म-
प्रत्ययार्थ इदमप्यसुष्ठु। आत्मा आत्मानं जानातीति प्रयोगानुपपत्तेः। आत्मान्यवृत्तिज्ञानाप्रसिद्ध्या तस्य तत्रान्वयबोधा-
संभवादित्यत आह। पटं जानातीत्यादौ। विषयित्वमिति तु कर्तरि तिङादिस्थले द्वितीयार्थाभिप्रायेण। विषयत्वमिति तु क- रुक्ष
र्मीत्याख्यातस्थले आख्यातार्थाभिप्रायेणोक्तं। जानातीत्येतस्य [illegible] स्य कर्माख्यातादिस्थलेऽपीत्यादिः। तथा च सविषयकार्थको

धकधात्वर्थसमभिव्याहृतद्वितीयासमभिव्याहृतस्थले फलादेर्धात्वर्थत्वनियमः। एवं तादृशधातुस्थले कर्मप्रत्ययस्य पर
समवेतत्वमर्थो नान्यत्रेति भावः। तथा सति तत्र तत्रान्वयबोधप्रकारं क्रमाह। अन्वयबोधे त्विति। एकत्रेति। कर्तर्यपि व्याख्यातस्थ
ले इत्यर्थः। अन्यत्रेति। कर्माख्यातस्थले इत्यर्थः। ननु विषयत्वादेः कर्मप्रत्ययार्थत्वे ज्ञातो घट इत्यत्र विषयत्वस्य ज्ञानादौ भेदा
न्वयबोधासंभवः। नामार्थयोर्भेदान्वयबोधानंगीकारात्। न वाऽभेदान्वयबोधः। बाधादित्यत आह। ज्ञान इत्यादि। तथा चाख्या
तस्थले कर्मप्रत्ययस्य विषयत्वादिकमर्थः। कर्मेत्याख्यातस्य यस्य तु विषयतादिकमर्थः। तस्य च प्रथमान्तार्थेऽभेदेनान्वय न ना
मार्थयोरभेदान्वयबोधस्य सर्वसंमतत्वादिति भावः। ननु सर्वत्र सविषयधात्वर्थविषयितया इतरपदार्थस्यान्वयांगीकारे
भुंजानो भोजनाय यतते इत्यादिप्रयोगानुपपत्तिः। तदा तत्र भोजनविषयककृत्यभावादित्यत आह। यतत इत्यादि। तथा च यति
पदार्थातिरिक्तसविषयकधात्वर्थत्वे सर्वत्र विषयित्वेन इतरपदार्थान्वयो न तु उद्देश्यत्वेनेति भावः। अत एवेति। [illegible] प
पदार्थे उद्देश्यत्वेनैवेतरपदार्थान्वयो न तु विषयित्वेन अत एवेत्यर्थः। अभुंजानेऽपीत्यादि। अन्यथा तदा तत्र भोजनविषयककृ
त्यभावेन तथाप्रयोगानुपपत्तिरिति भावः। मंडनमतं दूषयितुं तन्मतं दर्शयति। धातोरर्थः फलमिति। तथा च फलानुकूलव्या
पारे धातोः शक्तिवादिनोऽपि फले शक्तिकल्पनस्यावश्यकत्वात्तत्रैव तत्कल्पनमुचितमिति भावः। नन्वेवं सति गच्छतीत्या
दौ संयोगरूपफलानुकूलव्यापारबोधस्यानुभवसिद्धस्य कथं निर्वाह इत्यत आह। अनुकूलव्यापार इति। पदार्थैकदेशेऽ
न्वयानंगीकारे त्वाह। व्यापारमात्रं वेति। ननु केवलव्यापारस्याख्यातार्थत्वे गच्छतीत्यादौ धात्वर्थसंयोगाख्यातव्यापारयोः
कथं जन्यजनकभावस्तत्राह। जन्यजनकभाव इत्यादि। नन्वेवं सर्वत्र फलस्य धात्वर्थत्वे गच्छति यजेतेत्यादौ संयोगस्वर्गा
दिरूपफले वर्तमानत्वइष्टसाधनत्वादेरभावात्तदन्वयानुपपत्तिरित्यत आह। लडादीत्यादि। लडाद्यर्थवर्तमानत्वा

प्र
२२ दिकं लिङाद्यर्थ इष्टसाधनत्वादिकमित्यर्थः। वर्त्तमानत्वादीत्यादिना भाविष्यत्वावच्छिन्नग्रहः। एकपदोपात्तत्वेति। एकपदजन्योपस्थि
तिविषयत्वेत्यर्थः। तत्रैवेति। व्यापार एवेत्यर्थः। तथा चाख्यातार्थव्यापार एव वर्त्तमानत्वादेरन्वयांगीकारेऽप्यसमर्थवर्त्त
22 मानत्वादेरुपस्थितत्वेतरकल्पने लाघवमिति भावः। नन्वनुकूलस्य धात्वर्थत्वे ओदनादिरूपपाकफलानुत्पत्तिदशायां
तदनुकूलव्यापारादिरूपव्यापारसत्त्वे पाको भविष्यतीति प्रयोगापत्तिः। तत्र निरर्थकघञ्समभिव्याहृतपचधात्वर्थे
ओदनादिरूपफले वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वस्य सत्त्वादत आह। भावप्रत्ययस्य घञादेरिति।
भावप्रत्ययविहितस्य घञादिप्रत्ययस्येत्यर्थः। अनुकूलव्यापारे एवेति। तथा च तत्र भावविहितघञर्थतादृशव्यापार
स्य सिद्धत्वात्तत्र वर्त्तमानप्रागभावप्रतियोगित्वस्य वाधितत्वेन तथाप्रयोगस्यासंभवादिति भावः। तेनेति। भावविहित
घञ्प्रत्ययस्यानुकूलव्यापारार्थकत्वेनेत्यर्थकत्वेनेत्यर्थः। फलानुत्पाददशायामिति। ओदनादिरूपफलानुत्पाद
दशायामित्यर्थः। तादृशफलोत्पाददशायां तु तत्र वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वस्य ओदनादिरूपफ
लेऽभावेन तथाप्रयोगासंभवात्तथैवोक्तमिति। घञोऽनुकूलव्यापारार्थकत्वे पुनरुत्तरमाह। न वेति। व्यापारविगमे
विणाकादिरूपव्यापारविगमे इत्यर्थः। पाको विद्यत इति। अत्र तदा धात्वर्थओदनादिरूपफले वर्त्तमानकालसत्वं
च्छिन्नरूपविद्यमानत्वस्य सत्त्वेन तथाप्रयोगोपपत्तिसंभवादिति भावः। भावविहितघञादि इत्यत्रादिपदग्राह्यल्युट्
प्रत्ययस्य व्यापारार्थकत्वे युक्तिमाह। नापीत्यादि। अत्र भावल्युट्प्रत्ययस्य निरर्थकत्वे संयोगरूपफलमात्रस्य प्र. ६३
गमधात्वर्थत्वेन तस्य च घटभूतलोभयवर्त्तितया घटभूतलयोर्मिथो गमनमिति प्रयोगापत्तिर्दुर्वारैवेति तस्य व्या २२

पारार्थकत्वमावश्यकमिति भावः । नन्वेतन्मते कर्मत्वं न धात्वर्थतावच्छेदकफलशालित्वं फलस्यैव तन्मते धात्वर्थतया धात्वर्थतावच्छेदकत्वाभावे
न तथा लक्षणस्यासंभवदुष्टत्वात् । नापि परसमवेतव्यापारजन्यधात्वर्थफलशालित्वं तन्मते स्वात्मानं प्रयाति विहग इति प्रयोगापत्तेः । वि
हगस्य परो यः स्वावयवस्तत्समवेतो यः स्वात्मकव्यापारस्तज्जन्यधात्वर्थसंयोगात्मकफलशालित्वादित्यत आह । प्रत्ययोपनीतेति । प्रत्ययप्रती
यः परसमवेतव्यापारस्तज्जन्यं यद्धात्वर्थफलं तच्छालित्वमेतन्मते कर्मत्वमित्यर्थः । तथाविधस्वात्मकव्यापारस्य प्रत्ययोपनीतत्वाभावेन
न स्वात्मानं प्रयाति विहग इत्यत्र प्रसंगः । न चात्र व्यापारपदव्यर्थमिति वाच्यं व्यापारत्वेन प्रत्ययोपनीतत्वप्राप्ययेन स्यावादानात् । अन्यथा
वर्तमानत्वाद्यादिप्रत्ययोपनीतो यः परसमवेतकालोपाधिस्तज्जन्यधात्वर्थफलशालित्वेन स्वात्मनोपि कर्मत्वसंभवेन स्वात्मानं प्रयाति वि
हग इति प्रतीत्यापत्तेः । न च तथापि धात्वर्थत्वे[illegible]तीत्यर्थः । गच्छतीत्यादौ पूर्वदेशस्यापि कर्मत्वापत्तिः । तस्यापि प्रत्ययोपनीतो यः परसम
वेतव्यापारस्तज्जन्यं फलं विभागस्तच्छालित्वात् । तदुपादाने च न तथापत्तिः । तस्य धात्वर्थत्वाभावात् । अत्र च परसमवेतत्वं कर्मप्रत्ययार्थः । यो
तस्य च कर्त्राख्यातस्थले आख्यातार्थव्यापारे कर्माख्यातस्थले च निरूढमते तृतीयार्थव्यापारे एवान्वय इति । परत्वं तु धात्वर्थे
आधेयतासंबंधेन यदन्वेति तदपेक्षया धात्वर्थोऽधिकरणतासंबंधेन यत्रान्वेति तदपेक्षया वा बोध्यं । इत्थं च ग्रामं गच्छतीत्यादौ
ग्रामवृत्तिसंयोगजनक[illegible]ग्रामभिन्नसमवेतव्यापारवांश्चैत्रः चैत्रेण ग्रामो गम्यत इत्यत्र चैत्रवृत्तिग्रामभिन्नसमवेतव्यापार
जन्यसंयोगफलशाली ग्राम इति बोधः । ननु कर्त्राख्यातकर्माख्यातयोर्व्यापारत्वैकरूपेण कथं धर्मविधिन्नबोधकत्वे कथमेकत्र क
र्तृप्रत्ययः कर्मप्रत्यय इति व्यवहार अत आह । फलव्यापारयोरिति । तथा च फलस्य विशेषणत्वे व्यापारस्य विशेष्यत्वे कर्तृप्रत्यय इति
व्यवहारः । एवं फलस्य विशेष्यत्वे व्यापारस्य विशेषणत्वे कर्मप्रत्यय इति व्यवहार इति भावः । ननु कर्माख्यातस्थले धात्वर्थफल
स्य साक्षात् नामार्थेऽन्वयबोधांगीकारे नामार्थधात्वर्थयोः साक्षात् भेदान्वयबोधो नांगीक्रियत इति व्युत्पत्तिभंग इत्यत आह
वस्तुतस्त्विति । अधिकरणत्वमित्यादिग्रंथमात्रं तु यत्समर्थकं अर्थद्वयमनेनान्वयः । ननु कर्माख्यातवत्कर्मकृतोपि आश्रय

रम
२२

त्वबोधकत्वेन स्यात् नामार्थेऽन्वयबोधप्रसंगः नामार्थयोर्भेदान्वयस्यानंगीकारादित्यत आह। कर्मत्वेत्यादि इति। आश्रय इति।
फलस्येत्यादिः। कर्तृत्वे तु फलाश्रयबोधकत्वे एकाकारबोधजनकत्व —स्यार्थः आख्यातस्यापि यत्नत्वविशिष्टे शक्त्यापत्ति
रत आह। कर्त्रेत्यादि इति। कर्तृकर्मेत्यादि। उपदर्शितोभयस्थले कर्तृकर्मभ्यां सह कर्तृस्यार्थाभेदान्वयबोधस्यानुभवसिद्धत्वेनुरो
धादित्यर्थः। जानातीत्यादिप्रयोग इति। आख्यातकर्तृकर्मत्वे तामिति शेषः। पूर्वोक्तैवरीतिरिति। आश्रयत्वविषयत्वे कर्माख्यात
कर्माख्यातयोराश्रयविषयो कर्तृत्वे तु कर्मत्वे तु रर्थयोरित्यर्थः। सुवर्थ एवेत्यादि। पच्यते इत्यत्र व्यापारस्याख्यातार्थत्वाभावात्।
फलवर्तमानत्वान्वयबोधानंगीकारे व्यापारसत्वदशायां फलसत्वदशायामपि पच्यत इत्यादिप्रयोगापत्तिः। एवं पक्व इत्यादौ आख्या
तस्याभावेन तदर्थव्यापारेऽतीतत्वस्य बोध इति तु मन्तव्यत्वेन धात्वर्थफले। तीतत्वस्यान्वयांगीकारे फलसत्वदशायां व्यापारना
शदशायां पक्वस्तंडुल इति प्रयोगानुपपत्तिश्चेति भावः। वर्तमानत्वादीत्यादिना अतीतत्वादिपरिग्रहः। ननु पच्यमान इत्यादौ शानच्प्रत्य
यार्थैकदेशो व्यापार एव तदर्थवर्तमानत्वादेरन्वयः स्वीकर्तव्यस्तथा च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिभंगइ
त्यत आह। पच्यमान इत्यादि। तथा च प्रकृतस्थले तादृशव्युत्पत्तेः संकोचः कल्प्य इति भावः। सर्वत्र तादृशव्युत्पत्तिस्वीकारे बाह। स्वांवे
त्वान्वेवसति तत्र व्यापाराश्रयतया बोधस्यानुभवसिद्धस्य लोपप्रसंग इत्यत आह। विशिष्टमिति। आश्रयतासंबन्धेन व्यापार
विशिष्टाश्रयत्वमित्यर्थः। अन्वयलभ्यमिति। एकपदस्थापितयोः परस्परमन्वयबोधांगीकारेण द्वयोः कार्यकारणभावसि
दो द्धत्वाद्बोधविषय इत्यर्थः। तथा चैकपदोपस्थाप्ययोः परस्परमन्वयबोधे बाधकाभावेन तादृशविशिष्टार्थबोधो नानुपप
न्न इति भावः। नन्वेकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधोत्पत्तिसिद्ध इत्यत्र प्रमाणाभाव इत्यत आह। एवकार रु.ष
स्येति। तथा चैकपदस्थाप्ययोरर्थयोः परस्परमन्वयबोधानंगीकारे पार्थ एव धनुर्धर इत्यादौ पार्थान्ययोगव्यवच्छेदबो

२२

धोऽनुपपन्नः एवकारस्यापि अन्ययोगव्यवच्छेदे प्रसिद्धशक्तिकत्वस्वीकारे तदुपदर्शितानुपपत्तिग्रस्तत्वादिति भावः। न च एव
कारस्य द्वयमपि शक्तिर्न स्वीक्रियते किं तु अन्ययोगप्रतियोगित्वविशिष्टव्यवच्छेद एव। तथा चोपदर्शितान्वयबोधोऽनुप
पन्न इत्यत आह। अन्ययोगेत्यादि। अन्ययोगप्रतियोगित्वविशिष्टव्यवच्छेदमात्रस्येत्यर्थः। अतिप्रसङ्गेत्यादि। सर्वसा
धारणत्वादित्यर्थः। तथा च पार्थ एव धनुर्धर इत्यादिवत् चैत्र एव धनुर्धर इत्यादिप्रयोगापत्तिः। चैत्रान्ययोगघटितोभय
व्यवच्छेदस्य चैत्रान्ययोगप्रतियोगिकस्य धनुर्धरे विद्यमानत्वादिति भावः। नन्वन्ययोगत्वावच्छिन्नप्रतियोगिताकव्य
वच्छेद एव एवकारशक्यस्तथा च न चैत्र एव धनुर्धर इत्यादिप्रयोगः। पार्थरूपधनुर्धरे चैत्रान्ययोगस्य विद्यमानतया धनु
र्धरत्वावच्छेदेन चैत्रान्ययोगत्वावच्छिन्नाभावासत्वादतस्तत्र दोषमाह। अन्ययोगत्वावच्छिन्नेत्यादि। अन्ययोगिताकव्यवच्छेद
स्य शक्यत्वेऽन्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावरूपशक्याप्रसिद्धिः पृथिव्यामेव गन्ध इत्यादावन्यसमवेतत्वावच्छिन्ना
भावरूपशक्याप्रसिद्धिर्दोषो न संभवति। असमवेतस्य स्वप्रसिद्धिसंभावादतस्तत्र --- दोषमाह। बाधितत्वं चेति। पृथिव्या
मेव गन्ध इत्यादौ गन्धोऽन्यसमवेतत्वाभावस्य बाधितत्वं चेत्यर्थः। ननु तत्र गन्धेऽन्यसमवेतत्वव्यवच्छेदस्य बाधितत्वेऽपि पृथि
व्यन्यसमवेतत्वाभावस्य तत्राबाधितत्वेन बोधसंभवात्। एवं पार्थ एव धनुर्धर इत्यादावन्यतादात्म्याप्रसिद्धावपि पार्था
न्यतादात्म्याभावस्य प्रसिद्धिसंभवेन बोधसंभवात् अतो दूषणान्तरमाह। पार्थ एवेत्यादि विति। तस्य पार्थान्यतादात्म्या
त्वावच्छिन्नप्रतियोगिकोऽतो व्यवच्छेदस्य। ततोन्यत्वात्। एवकारेण शक्यतावच्छेदकरूपावच्छिन्नान्यत्वात्। शक्यतावच्छेदकावच्छि
न्नस्यैव पदादुपस्थितिसंभवेन एवकारार्थपार्थान्यतादात्म्यव्यवच्छेदस्य प्रत्ययासंभव इति भावः। ननु स्वान्यदोनीरस्य त्वाव
च्छिन्नप्रतियोगिताकाभावादेरेवकारस्य शक्तिः कल्पनीया। अत्र स्वपदं यत्पदसमभिव्याहृतत्वविभक्तिसमभिव्याहृत

राम
२४

एवकारस्थले तत्तत्सत्त्वं। तथा च नीलपदार्थेतानुपपत्तिस्तत्र दोषमाह। स्वान्येत्यादि। स्वस्य स्वानुगमात्। पार्थपदे चैत्यादिसाधारणानुगतस्व
त्वस्याभावात्। पृथिव्यन्ययोगव्यवच्छेदः पार्थान्यव्यवच्छेदः इत्येवकारस्य नानार्थशक्तिकल्पनेन तन्नयानं स्यात्। तथा च नानैकशक्तिकल्प
नमिथ्यानुपदर्शितप्रकारोऽनादरणीय इति भावः। नन्वेवकारस्यान्ययोगिन्ययोगव्यवच्छेदे च नानाशक्तिवादिमते कथं पार्थ ए
३ व धनुर्धर इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदबोध इत्यत आह। तस्मादित्यादि। यथा नीलो घटो नास्तीत्यादौ घटत्वावच्छिन्ने नी
लस्यान्वयेन नीलघटत्वावच्छिन्नाभावः प्रतीयते तथा पार्थ एवेत्यादौ एवकारार्थ अन्यैकदेशे भेदे पार्थस्यान्वयेनान्यस्य च
योगेऽन्वयेन योगस्य व्यवच्छेदेऽन्वयेन पार्थान्यतादात्म्यव्यवच्छेदः प्रतीयत इति समुदितग्रन्थार्थः। ननु कर्तृत्वकर्तर्थव्यापाराश्र
येकदेशे व्यापारे वर्तमानत्वाद्यन्वयस्वीकारे मतेन पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिसंकोच एव दो
षः व्यापाराश्रययोः तस्य नानाशक्यत्वेनानन्तशक्तिकल्पनाप्रसंग अत आह। समानं चेति। तथा चाख्यातस्य कृतित्वेन
तो शक्तिवादिना [illegible] पि कर्तृत्वदर्थ इत्याश्रयैकदेशे कृतौ वर्तमानत्वादेरन्वयाभ्युपगमे उपदर्शितव्युत्पत्तिभंगः कर्तृत्व
तः कृतो आश्रये च शक्तिद्वयस्वीकारेऽनन्तशक्तिकल्पनाप्रसंगोऽवश्यमभ्युपेय इति मतद्वयमिति भावः। ननु आख्यातकृ
र्तृकृतौ व्यापारतदाश्रययोः शक्यत्वे संयुज्यते संयुक्तः इत्यादावपि तथैव वक्तव्यतया युक्ताद्यातोः सकर्मकत्वापत्तिः। प्रत्ययो
पनीतधात्वर्थानुकूलव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्र वक्त्वादौ संभवादित्यत आह। धात्वर्थेत्यादि।
तथा च तत्र प्रत्ययस्य व्यापारार्थकत्वे तथाविधव्यापारविरहिणि वस्त्वेतादृशप्रत्ययानुपपत्तिरिति भावः। ननु अ कृष्ण
दृष्टवदात्मसंयोगादिरूपव्यापारस्य तत्र वक्त्रादौ सत्त्वेन तत्र तथाविधव्यापारविरह एवाप्रसिद्ध इति। संयुज्य २४
त इत्यादौ प्रत्ययस्य व्यापारार्थकत्वेनोक्तानुपपत्तिरतो दूषणान्तरमाह। संयोगमात्रजनीत्येति। मात्रपदेन व्या

पारथ्यवच्छेदः। तथा सति तत्र व्यापारस्याविरोधस्यादिति भावः। न सकर्मकत्वमिति। व्यापारस्य प्रत्ययोपनीतत्वाभावेन प्रत्ययोप
नीततादृशव्यापारजन्यफलशालित्वरूपसकर्मकत्वस्य तत्र कोप्यभावान्न सकर्मकत्वमिति भावः। ननु धात्वोर्व्यापारार्थकत्वे भा
वे घञ्नी सत्त्वनुशासनविरोधः। तादृशानुशासनेन घञः प्रयोगसाधुत्वमात्रप्रतीतेरत आह। संयोग इत्यादाविति। तथा चेता
दृशानुशासनेन तस्य नाभिप्रायकमिति न दोष इति भावः। नन्वेसादि। तत्र लक्षणया तादृशानुबोधे भवपादाने तु घेलो
वात्वलत्वमेव शक्यतावच्छेदकं युक्तमिति भावः। मंडनमते दोषान्तरमाह। फलेति। तथा च पाकानुकूलासाधारणव्यापा
रताभाववति अदृष्टादिरूपसाधारणव्यापारवति पुरुषे पचतीत्यादिप्रयोगप्रसंगो मंडनमते दुर्वार इति भावः। नन्वसा
धारणानूनं केलाश्रयव्यापारस्याख्यातार्थत्वेनोक्तदोषद्वयस्यात आह। विभागादीति। चलतीत्यादौ चावृत्तिसंभवति सतोऽनि
श्चेलाविदास्फोटाभावकरमतमुपन्यस्य तत्र दूषणान्तरमाह। तत्र तत्रेत्यादिना। तत्र तत्र गच्छतीत्यादौ। तत्र फलेति। संयो
गविभागादीत्यर्थः। केचित्त्वाश्रयत्वादिकमपीति भावाः। ख्यातस्य लेआश्रयत्वादेरभावात् केचिदतिप्रसंगादिति। ल
क्षणादिना तादृशानुभवोपपाने दोनुलोघवतर्कस्यैव शरणीकरणीयत्वादिति भावः॥ ॥इति श्रीरघुदेवभट्टाचा
र्यविरचिता ख्यातवादटिप्पणी समाप्ता॥ ॥घ॥ ॥शुभमस्तु॥

९५

२००

१०९ सद्वानवाद टीका।
१२..